DILUVIUM

[illegible]

MAHA-BHARATI PRAESTANTISSIMIS EPISODIIS

[illegible]

FRANCISCUS BOPP.

FASCICULUS PRIOR,

[illegible]

BEROLINI

[illegible]

[illegible]

[illegible]



॥ मत्स्योपाख्यानम् ॥

॥ मार्कण्डेय उवाच ॥

विवस्वतः सुतो राजा महर्षिः स प्रतापवान् ।
बभूव नरशार्दूलः प्रजापतिसमद्युतिः ॥ १ ॥
ओजसा तेजसा लक्ष्म्या तपसा च विशेषतः ।
अतिचक्राम पितरम् मनुः स्वं च पितामहम् ॥ २ ॥
ऊर्द्ध्वबाहुर् विशालायां वदर्यां स नराधिपः ।
एकपादस्थितस् तीव्रं चचार स महत् तपः ॥ ३ ॥
अवाक्शिरास् तथा चा ऽपि नेत्रैर् अनिमिषैर् दृढम् ।
सो ऽतप्यत तपो घोरं वर्षाणाम् अयुतं तदा ॥ ४ ॥
तं कदाचित् तपस्यन्तम् आर्द्रचीरजटाधरम् ।
वीरिणीतीरम् आगम्य मत्स्यो वचनम् अब्रवीत् ॥ ५ ॥
भगवन् क्षुद्रमत्स्यो ऽस्मि बलवद्भ्यो भयम् मम ।
मत्स्येभ्यो हि ततो मां त्वं त्रातुम् अर्हसि सुव्रत ॥ ६ ॥

दुर्बलम् बलवन्तो हि मत्स्या मत्स्यं विशेषतः ।
खादयन्ति तथा वृत्तिर् विहिता नः सनातनी ॥७॥
तस्माद् भयौघान् महतो मज्जन्तम् मां विशेषतः ।
त्रातुम् अर्हसि कर्तास्मि कृते प्रतिकृतं तव ॥८॥

॥ मार्कण्डेय उवाच ॥

स मत्स्यवचनं श्रुत्वा कृपया भिपरिप्लुतः ।
मनुर् वैस्वतोऽगृह्णात् तम् मत्स्यम् पाणिना स्वयम् ॥९॥
उदकान्तम् उपानीय मत्स्यं वैवस्वतो मनुः ।
अलिञ्जरे प्राक्षिपत् स चन्द्रांशुसदृशप्रभे ॥१०॥
स तत्र ववृधे राजन् मत्स्यः परमसत्कृतः ।
पुत्रवच् चा करोत् तस्मिन् मनुर् भावं विशेषतः ॥११॥
अथ कालेन महता स मत्स्यः सुमहान् अभूत् ।
अलिञ्जरे यदा चै व ना सौ समभवत् किल ॥१२॥
अथ मत्स्यो मनुं दृष्ट्वा पुनर् एवा भ्यभाषत ।
भगवन् साधो मेऽन्या न्यत् स्थानं सम्प्रतिपादय ॥१३॥
उद्धृत्या लिञ्जरात् तस्मात् ततः स भगवान् मनुः ।
तम् मत्स्यम् अनयद् वापीम् महतीं स मनुस् तदा ॥१४॥
तत्र तम् प्राक्षिपच् चा पि मनुः परपुरञ्जयः ।
अथा वर्द्धत मत्स्यः स पुनर् वर्षगणान् बह्नन् ॥१५॥

त्रियोजनायता वापी विस्तृता चा ऽपि योजनम् ।
तस्यां न स्थातुम् अशकत् मत्स्यो राजीवलोचनः ॥ १६ ॥
विचेष्टितुं वा कौन्तेय मत्स्यो वाप्यां विशाम् पते ।
मनुम् मत्स्यस् ततो दृष्ट्वा पुनर् एवा ऽभ्यभाषत ॥ १७ ॥
नय माम् भगवन् साधो समुद्रमहिषीम् प्रभो ।
गङ्गां तत्र निवत्स्यामि यथा वा तात मन्यसे ॥ १८ ॥
निदेशे हि मया तुभ्यं स्थातव्यम् अनसूयता ।
वृद्धिर् हि परमा प्राप्ता त्वत्कृते ऽयम् मया ऽनघ ॥ १९ ॥
एवम् उक्तो मनुर् मत्स्यम् अनयद् भगवान् वशी ।
नदीं गङ्गां तत्र चै ऽनं स्वयम् प्राक्षिपद् अच्युतः ॥ २० ॥
स तत्र ववृधे मत्स्यः कश्चित् कालम् अरिन्दम ।
ततः पुनर् मनुं दृष्ट्वा मत्स्यो वचनम् अब्रवीत् ॥ २१ ॥
गङ्गायां हि न शक्नोमि बृहत्त्वाच् चेष्टितुम् प्रभो ।
समुद्रं नय माम् आशु प्रसीद भगवन् मम ॥ २२ ॥
उद्धृत्य गङ्गासलिलात् ततो मत्स्यम् मनुः स्वयम् ।
समुद्रम् अनयत् पार्थ तत्र चै ऽनम् अवासृजत् ॥ २३ ॥
सुमहान् अपि मत्स्यस् तु स मनोर् नयतस् तदा ।
आसीद् यथेष्टहार्यश् च स्पर्शगन्धसुखश् च वै ॥ २४ ॥
यदा समुद्रे प्रक्षिप्तः स मत्स्यो मनुना तदा ।

तत एनम् इदं वाक्यं स्मयमान इवा ऽब्रवीत् ॥२५॥
भगवन् हि कृता रक्षा त्वया सर्वा विशेषतः ।
प्राप्तकालं तु यत् कार्यं त्वया तच् छ्रूयताम् मम ॥२६॥
अचिराद् भगवन् भौमम् इदं स्थावरजङ्गमम् ।
सर्वतो हि महाभाग प्रलयं वै गमिष्यति ॥२७॥
सम्प्रक्षालनकालो ऽयं लोकानां समुपस्थितः ।
तस्मात् त्वाम् बोधयाम्य् अद्य यत् ते हितम् अनुत्तमम् ॥२८॥
त्रसानां स्थावराणां च यच् चे ऽङ्गं यच् च ने ऽङ्गति ।
तस्य सर्वस्य सम्प्राप्तः कालः परमदारुणः ॥२९॥
नौश् च कारयितव्या ते दृढा युक्तवटारका ।
तत्र सप्तर्षिभिः सार्द्धम् आरुहेथा महामुने ॥३०॥
बीजानि चै ऽव सर्वाणि यथो ऽक्तानि द्विजैः पुरा ।
तस्याम् आरोहयेर् नावि सुसङ्गुप्तानि भागशः ॥३१॥
नौस्थश् च माम् प्रतीक्षेथास् ततो मुनिजनप्रिय ।
आगमिष्याम्य् अहं शृङ्गी विज्ञेयस् तेन तापस ॥३२॥
एवम् एतत् त्वया कार्यम् आपृष्टो ऽसि गच्छाम्य् अहम् ।
ता न शक्या महत्यो वै आपस् तर्तुम् मया विना ॥३३॥
ना ऽभिशङ्क्यम् इदं चा ऽपि वचनम् मे त्वया विभो ।
एवं करिष्य इति तं स मत्स्यम् प्रत्यभाषत ॥३४॥

जग्मतुश् च यथाकामम् अनुज्ञाप्य परस्परम् ।
ततो मनुर् महाराज यथो क्तम् मत्स्यकेन ह ॥३५॥
बीजान्य् आदाय सर्वाणि सागरम् पुप्लुवे तदा ।
नौकया शुभया धीरो महोर्मिणम् अरिन्दम ॥३६॥
चिन्तयामास स मनुस् तम् मत्स्यम् पृथिवीपते ।
स च तच्चिन्तितं ज्ञात्वा मत्स्यः परपुरञ्जय ।
शृङ्गी तत्र जगाम्आ ऽशु तदा भरतसत्तम ॥३७॥
तं दृष्ट्वा मनुजव्याघ्र मनुर् मत्स्यं जलार्णवे ।
शृङ्गिणं तं यथोक्तेन रूपेणा ऽद्रिम् इवो ऽच्छ्रितम् ॥३८॥
वटारकमयम् पाशम् अथ मत्स्यस्य मूर्धनि ।
मनुर् मनुजशार्दूल तस्मिन् शृङ्गे न्यवेशयत् ॥३९॥
संयतस् तेन पाशेन मत्स्यः परपुरञ्जय ।
वेगेन महता नावम् प्राकर्षल् लवणाम्भसि ॥४०॥
स ततार् तया नावा समुद्रम् मनुजेश्वरः ।
नृत्यमानम् इवो ऽर्मिभिर् गर्जमानम् इवा ऽम्भसा ॥४१॥
क्षोभ्यमाना महावातैः सा नौस् तस्मिन् महोदधौ ।
घूर्णते चपले ऽव स्त्री मत्ता परपुरञ्जय ॥४२॥
नै ऽव भूमिर् न च दिशः प्रदिशो वा प्रकाशिरे ।
सर्वम् आम्भसम् एवा ऽसीत् खं द्यौश् च नरपुङ्गव ॥४३॥

एवम् भूते तदा लोके सकले भरतर्षभ ।
अदृश्यन्त ऋषयः सप्त मनुर् मत्स्यस् तथैव ह ॥४४॥
एवं बहून् वर्षगणांस् तां नावं सोऽथ मत्स्यकः ।
चकर्षा तन्द्रितो राजन् तस्मिन् सलिलसञ्चये ॥४५॥
ततो हिमवतः शृङ्गं यत् परम् भरतर्षभ ।
तत्रा कर्षत् ततो नावं स मत्स्यः कुरुनन्दन ॥४६॥
अथा ब्रवीत् तदा मत्स्यस् तान् ऋषीन् प्रहसन् शनैः ।
अस्मिन् हिमवतः शृङ्गे नावम् बध्नीत माचिरम् ॥४७॥
सा बद्धा तत्र तैस् तूर्णम् ऋषिभिर् भरतर्षभ ।
नौर् मत्स्यस्य वचः श्रुत्वा शृङ्गे हिमवतस् तदा ॥४८॥
तच् च नौबन्धनं नाम शृङ्गं हिमवतः परम् ।
ख्यातम् अद्या पि कौन्तेय तद् विद्धि भरतर्षभ ॥४९॥
अथा ब्रवीद् अनिमिषस् तान् ऋषीन् सहितस् तदा ।
अहम् प्रजापतिर् ब्रह्मा मत् परं ना धिगम्यते ॥५०॥
मत्स्यरूपेण यूयं च मया स्मान् मोक्षिता भयात् ।
मनुना च प्रजाः सर्वाः सदेवासुरमानुषाः ॥५१॥
स्रष्टव्याः सर्वलोकाश् च यच् चे ङ्गं यच् च ने ङ्गति ।
तपसा चा तितीव्रेण प्रतिभाष्यम् भविष्यति ॥५२॥
मत्प्रसादात् प्रजासर्गे न च मोहं गमिष्यति ।

इत्य् उक्त्वा वचनम् मत्स्यः क्षणेना ऽदर्शनं गतः ॥५३॥
स्रष्टुकामः प्रजाश् चा ऽपि मनुर् वैवस्वतः स्वयम् ।
प्रमूढो ऽभूत् प्रजासर्गे तपस् तेपे महत् ततः ॥५४॥
तपसा महता युक्तः सो ऽथ स्रष्टुम् प्रचक्रमे ।
सर्वाः प्रजा मनुः साक्षाद् यथावद् भरतर्षभ ॥५५॥
इत्य् एतन् मात्स्यकं नाम पुराणम् परिकीर्तितम् ।
आख्यानम् इदम् आख्यातं सर्वपापहरम् मया ॥५६॥
य इदं शृणुयान् नित्यम् मनोश् चरितम् आदितः ।
स सुखी सर्वपूर्णार्थः स्वर्गलोकम् इयान् नरः ॥५७॥
॥ इत्यारण्यके पर्वणि मत्स्योपाख्यानं समाप्तम् ॥०॥



॥ सावित्र्युपाख्यानम् ॥

॥ मार्कण्डेय उवाच ॥

शृणु राजन् वरस्त्रीणाम् महाभाग्यं युधिष्ठिर ।
सर्वम् एव यथा प्राप्तं सावित्र्या राजकन्यया ॥१॥
आसीन् मद्रेषु धर्मात्मा राजा परमधार्मिकः ।
ब्रह्मण्यश् च शरण्यश् च सत्यसन्धो जितेन्द्रियः ॥२॥
यज्वा दानपतिर् दक्षः पौरजानपदप्रियः ।
पार्थिवोऽश्वपतिर् नाम सर्वभूतहिते रतः ॥३॥
क्षमावान् अनपत्यश् च सत्यवान् संयतेन्द्रियः ।
अतिक्रान्तेन वयसा सन्तापम् उपजग्मिवान् ॥४॥
अपत्योत्पादनार्थं च तीव्रं नियमम् आस्थितः ।
काले परिमिताहारो ब्रह्मचारी जितेन्द्रियः ॥५॥
हुत्वा शतसहस्रशः सावित्र्या राजसत्तमः ।
षष्ठे षष्ठे तदा काले बभूव मितभोजनः ॥६॥

एतेन नियमेना ऽसीद् वर्षाणि दश चा ऽष्ट च ।
पूर्णे त्व् अष्टादशे वर्षे सावित्री तुष्टिम् अभ्यगात् ॥७॥
रूपिणी तु तदा राजन् दर्शयामास तं नृपम् ।
अग्निहोत्रात् समुत्थाय हर्षेण महता ऽन्विता ।
उवाच चै ऽनं वरदा वचनम् पार्थिवं तदा ॥८॥
ब्रह्मचर्येण शुद्धेन नियमेन दमेन च ।
सर्वात्मना च भक्त्या च तुष्टा ऽस्मि तव पार्थिव ॥९॥
वरं वृणीष्वा ऽश्वपते मद्रराज यथे ऽप्सितम् ।
न प्रमादश् च धर्मेषु कर्तव्यस् ते कथञ्चन ॥१०॥

॥ अश्वपतिर् उवाच ॥

अपत्यार्थं समारम्भः कृतो धर्मेप्सया मया ।
पुत्रा मे बहवो देवि भवेयुः कुलभावनाः ॥११॥
तुष्टा ऽसि यदि मे देवि कामम् एतं वृणोम्य् अहम् ।
सन्तानो हि परो धर्म इत्य् आहुर् मां द्विजातयः ॥१२॥

॥ सावित्र्य् उवाच ॥

पूर्वम् एव मया राजन् अभिप्रायम् इमं तव ।
ज्ञात्वा पुत्रार्थम् उक्तो वै तव हेतोः पितामहः ॥१३॥
प्रसादाच् चै ऽव तस्मात् ते स्वयम्भूविहितान् नृप ।
कन्या तेजस्विनी सौम्या क्षिप्रम् एव भविष्यति ॥१४॥

उत्तरं च न ते किंचिद् व्याहर्तव्यं कथंचन ।
पितामहनिसर्गेण तुष्टा ह्य् एतद् ब्रवीमि ते ॥१५॥
॥ मार्कण्डेय उवाच ॥
स तथे ति प्रतिज्ञाय सावित्र्या वचनं नृपः ।
प्रसादयामास पुनः क्षिप्रम् एतद् भवद् इति ॥१६॥
अन्तर्हितायां सावित्र्यां जगाम स्वगृहम् पुनः ।
स्वराज्ये चा वसत् प्रीतः प्रजा धर्मेण पालयन् ॥१७॥
कस्मिंश्चित् तु गते काले स राजा नियतव्रतः ।
ज्येष्ठायां धर्मचारिण्याम् महिष्यां गर्भम् आदधे ॥१८॥
राजपुत्र्यां तु गर्भः स मालव्याम् भरतर्षभ ।
व्यवर्द्धत यथा शुक्ले तारापतिर् इवा म्बरे ॥१९॥
प्राप्ते काले तु सुषुवे कन्यां राजीवलोचनाम् ।
क्रियाश् च तस्या मुदितश् चक्रे स नृपतिस् तदा ॥२०॥
सावित्र्या प्रीतया दत्ता सावित्र्या हुतया ह्य् अपि ।
सावित्री त्य् एव नामा स्याश् चक्रुर् विप्रास् तथा पिता ॥२१॥
सा विग्रहवती व श्रीर् व्यवर्द्धत नृपात्मजा ।
कालेन चा पि सा कन्या यौवनस्था बभूव ह ॥२२॥
तनुमध्याम् पृथुश्रोणीम् प्रतिमां काञ्चनीम् इव ।
प्राप्ते यं देवकन्ये ति दृष्ट्वा सम्मेनिरे जनाः ॥२३॥

तां तु पद्मपलाशाक्षीं ज्वलन्तीम् इव तेजसा ।
न कश्चिद् वरयामास तेजसा प्रतिवाधितः ॥२४॥
अथा ऽप्य् एषा शिरःस्नाता देवतां अभिगम्य सा ।
हुत्वा ऽग्निं विधिवद् विप्रान् वाचयामास पर्वणि ॥२५॥
ततः सुमनसः शेषाः प्रतिगृह्य महात्मनः ।
पितुः समीपम् अगमद् देवी श्रीर् इव रूपिणी ॥२६॥
सा ऽभिवाद्य पितुः पादौ शेषाः पूर्वं निवेद्य च ।
कृताञ्जलिर् वरारोहा नृपतेर् पार्श्वम् आस्थिता ॥२७॥
यौवनस्थां तु तां दृष्ट्वा स्वां सुतां देवरूपिणीम् ।
अयाच्यमानां च वरैर् नृपतिर् दुःखितो ऽभवत् ॥२८॥

॥ राजो वाच ॥

पुत्रि प्रदानकालस् ते न च कश्चिद् वृणोति त्वाम् ।
स्वयम् अन्विच्छ भर्तारं गुणैः सदृशम् आत्मनः ॥२९॥
प्रार्थितः पुरुषो यश् च स निवेद्यस् त्वया मम ।
विमृश्या ऽहम् प्रदास्यामि वरय त्वं यथे ऽप्सितम् ॥३०॥
श्रुतं हि धर्मशास्त्रेषु पठ्यमानं द्विजातिभिः ।
तथा त्वम् अपि कल्याणि गदतो मे वचः शृणु ॥३१॥
अप्रदाता पिता वाच्यो वाच्यश् चा ऽनुपयन् पतिः ।
मृते भर्तरि पुत्रश् च वाच्यो मातुर् अरक्षिता ॥३२॥

इदम् मे वचनं श्रुत्वा भर्तुर् अन्वेषणे त्वर ।
देवतानां यथा वाच्यो न भवेयं तथा कुरु ॥३३॥
॥ मार्कण्डेय उवाच ॥
एवम् उक्त्वा दुहितरं तथा वृद्धांश् च मन्त्रिणः ।
व्यादिदेशा ऽनुयात्रं च गम्यतां चे ऽत्य् अचोदयत् ॥३४॥
सा ऽभिवाद्य पितुः पादौ व्रीडिते ऽव तपस्विनी ।
पितुर् वचनम् आज्ञाय निर्जगामा ऽविचारितम् ॥३५॥
सा हैमं रथम् आस्थाय स्थविरैः सचिवैर् वृता ।
तपोवनानि रम्याणि राजर्षीणां जगाम ह ॥३६॥
मान्यानां तत्र वृद्धानां कृत्वा पादाभिवादनम् ।
वनानि क्रमशस् तानि सर्वाण्य् एवा ऽभ्यगच्छत ॥३७॥
एवं तीर्थेषु सर्वेषु धनोत्सर्गं नृपात्मजा ।
कुर्वती द्विजमुख्यानां तं तं देशं जगाम ह ॥३८॥
॥ इति महाभारते सावित्र्युपाख्याने प्रथमः सर्गः ॥१॥

॥ मार्कण्डेय उवाच ॥
अथ मद्राधिपो राजा नारदेन समागतः
उपविष्टः सभामध्ये कथायोगेन भारत ॥१॥

ततो ऽभिगम्य तीर्थानि सर्वाण्य् एवा ऽश्रमांस् तथा ।
आजगाम पुनर् वेश्म सावित्री सह मन्त्रिभिः ॥ २ ॥
नारदेन समासीनं दृष्ट्वा सा पितरं शुभा ।
उभयोर् एव शिरसा चक्रे पादाभिवन्दनम् ॥ ३ ॥

॥ नारद उवाच ॥

क्व गता ऽभूत् सुते ऽयं ते कुतश् चै ऽवा ऽगता नृप ।
किमर्थं युवतीम् भर्ता न चै ऽनां सम्प्रयच्छसि ॥ ४ ॥

॥ अश्वपतिर् उवाच ॥

कार्येण खल्व् अनेनै ऽव प्रेषिता ऽद्यै ऽव चा ऽगता ।
तद् अस्याः शृणु देवर्षे भर्ता वै यो ऽनया वृतः ॥ ५ ॥
सा ब्रूहि विस्तरेणे ऽति पित्रा सञ्चोदिता शुभा ।
दैवतस्ये ऽव वचनम् प्रतिगृह्ये ऽदम् अब्रवीत् ॥ ६ ॥
आसीच् छाल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः ।
द्युमत्सेन इति ख्यातः पश्चाद् अन्धो बभूव ह ॥ ७ ॥
विनष्टचक्षुषस् तस्य बालपुत्रस्य धीमतः ।
सामीप्येन हृतं राज्यं छिद्रे ऽस्मिन् पूर्ववैरिणा ॥ ८ ॥
स बालवत्सया सार्द्धम् भार्यया प्रस्थितो वनम् ।
महारण्यं गतश् चा ऽपि तपस् तेपे महाव्रतः ॥ ९ ॥
तस्य पुत्रः पुरे जातः संवृद्धश् च तपोवने ।

सत्यवान् अनुरूपो वै भर्ते ति मनसा वृतः ॥१०॥

॥ नारद उवाच ॥

अहो बत महत् पापं सावित्र्या नृपते कृतम् ।
अज्ञानन्त्या यद् अनया गुणवान् सत्यवान् वृतः ॥११॥
सत्यं वदत्य् अस्य पिता सत्यम् माता प्रभाषते ।
ततोऽस्य ब्राह्मणाश् चक्रुर् नामै तत् सत्यवान् इति ॥१२॥
बालस्या श्वाः प्रियाश् चा स्य करोत्य् अश्वांश् च मृन्मयान् ।
चित्रेऽपि चा लिखत्य् अश्वांश् चित्राश्व इति चो च्यते ॥१३॥

॥ राजो वाच ॥

अपी दानीं स तेजस्वी बुद्धिमान् स नृपात्मजः ।
क्षमावान् अपि वा शूरः सत्यवान् पितृवत्सलः ॥१४॥

॥ नारद उवाच ॥

विवस्वान् इव तेजस्वी बृहस्पतिसमो मतौ ।
महेन्द्र इव शूरश् च वसुधे व क्षमान्वितः ॥१५॥

॥ अश्वपतिर् उवाच ॥

अपि राजात्मजो दाता ब्रह्मण्यश् चा पि सत्यवान् ।
रूपवान् अप्य् उदारो वा अथ वा प्रियदर्शनः ॥१६॥

॥ नारद उवाच ॥

साङ्कृते रन्तिदेवस्य स्वशक्त्या दानतः समः ।

ब्रह्मण्यः सत्यवादी च शिबिर् औशीनरो यथा ॥१७॥
ययातिर् इव चो ऽदारः सोमवत् प्रियदर्शनः
रूपेणा ऽप्रतिमो ऽश्विभ्यां द्युमत्सेनसुतो बली ॥१८॥
स दान्तः स मृदुः शूरः स सत्यः संयतेन्द्रियः ।
स मैत्रः सो ऽनसूयश् च धृतिमान् द्युतिमांश् च सः ॥१९॥
नित्यशश् चा ऽऽर्जवं तस्मिन् स्थितिस् तस्यै ऽव च ध्रुवा ।
संक्षेपतस् तपोवृद्धैः शीलवृद्धैश् च कथ्यते ॥२०॥

॥ अश्वपतिर् उवाच ॥

गुणैर् उपेतं सर्वैस् तम् भगवन् प्रब्रवीषि मे ।
दोषान् अप्य् अस्य मे ब्रूहि यदि सन्ती ऽह केचन ॥२१॥

॥ नारद उवाच ॥

एक एवा ऽस्य दोषो हि गुणान् आक्रम्य तिष्ठति ।
स च दोषो प्रयत्नेन न शक्यम् अतिवर्तितुम् ॥२२॥
एको दोषो ऽस्य ना ऽन्यो ऽस्ति सो ऽद्यप्रभृति सत्यवान् ।
संवत्सरेण क्षीणायुर् देहन्यासं करिष्यति ॥२३॥

॥ राजो ऽवाच ॥

एहि सावित्रि गच्छ त्वम् अन्यं वरय शोभने ।
तस्य दोषो महान् एको गुणान् आक्रम्य तिष्ठति ॥२४॥
यथा माम् भगवान् आह नारदो देवसत्कृतः ।

संवत्सरेण सोऽल्पायुर् देहन्यासं करिष्यति ॥२५॥

॥ सावित्र्य् उवाच ॥

सकृद् अंशो निपतति सकृत् कन्या प्रदीयते ।
सकृद् आह ददानी ति त्रीण्य् एतानि सकृत् सताम् ॥२६॥
दीर्घायुर् अथ वा ऽल्पायुः सगुणो निर्गुणोऽपि वा ।
सकृद् वृतो मया भर्ता न द्वितीयं वृणोम्य् अहम् ॥२७॥
मनसा निश्चयं कृत्वा ततो वाचा ऽभिधीयते ।
कर्मणा क्रियते पश्चात् प्रमाणम् मे मनस् ततः ॥२८॥

॥ नारद उवाच ॥

स्थिरा बुद्धिर् नरश्रेष्ठ सावित्र्या दुहितुस् तव ।
नै ऽषा वारयितुं शक्या धर्माद् अस्मात् कथञ्चन ॥२९॥
ना ऽन्यस्मिन् पुरुषे सन्ति ये सत्यवति वै गुणाः ।
प्रदानम् एव तस्मान् मे रोचते दुहितुस् तव ॥३०॥

॥ राजो ऽवाच ॥

अविचाल्यम् एतद् उक्तं तथ्यम् भगवता वचः ।
करिष्यामि तद् एवं वै गुरुर् हि भगवान् मम ॥३१॥

॥ नारद उवाच ॥

अविघ्नम् अस्तु सावित्र्याः प्रदानं दुहितुस् तव ।
साधयिष्याम्य् अहं तावत् सर्वेषाम् भद्रम् अस्तु वः ॥३२॥

॥ मार्कण्डेय उवाच ॥

एवम् उक्त्वा समुत्पत्य नारदस् त्रिदिवं गतः ।
राजा ऽपि दुहितुः सर्वं वैवाहिकम् अकारयत् ॥ ३३ ॥

॥ इति महाभारते सावित्र्युपाख्याने द्वितीयः सर्गः ॥ २ ॥

॥ मार्कण्डेय उवाच ॥

अथ कन्याप्रदानाय वैवाहिकम् अचिन्तयत् ।
समानिन्ये च तत् सर्वम् भाण्डं वैवाहिकं नृपः ॥ १ ॥
ततो वृद्धान् द्विजान् सर्वान् ऋत्विजः सपुरोहितान् ।
समाहूय तिथौ पुण्ये प्रययौ सह कन्यया ॥ २ ॥
मेध्यारण्यं स गत्वा च द्युमत्सेनाश्रमं नृपः ।
पद्भ्याम् एव द्विजैः सार्द्धं राजर्षिस् तम् उपागमत् ॥ ३ ॥
तत्रा ऽपश्यत् महात्मानं सालवृक्षम् उपाश्रितम् ।
कौश्यां वृष्यां समासीनं चक्षुर्हीनं नृपं तदा ॥ ४ ॥
स राजा तस्य राजर्षेः कृत्वा पूजां यथाविधि ।
वाचा सुनियतो भूत्वा चकारा ऽऽत्मनिवेदनं ॥ ५ ॥
तस्या ऽर्घम् आसनं चै ऽव गां चा ऽऽवेद्य स धर्मवित् ।
किम् आगमनम् इत्य् एव राजा राजानम् अब्रवीत् ॥ ६ ॥

तस्य सर्वम् अभिप्रायम् इतिकर्तव्यतां च ताम् ।
सत्यवन्तं समुद्दिश्य सर्वम् एव न्यवेदयत् ॥७॥

॥ अश्वपतिर् उवाच ॥

सावित्री मम राजर्षे कन्येयम् मम शोभना ।
तां स्वधर्मेण धर्मज्ञ स्नुषार्थं त्वं गृहाण मे ॥८॥

॥ द्युमत्सेन उवाच ॥

च्युताः स्म राज्याद् वनवासम् आश्रितास् चराम धर्मं नियतास् तपस्विनः ।
कथं त्व् अनर्हा भवनवासम् आश्रमे सहिष्यति क्लेशम् इमं सुता तव ॥९॥

॥ अश्वपतिर् उवाच ॥

सुखं दुःखं च भवाभवात्मकं सदा विजानाति सुताहम् एव च ।
न मद्विधे युज्यति वाक्यम् ईदृशं विनिश्चयेनाभिगतो ऽस्मि ते नृप ॥१०॥

आशां नार्हसि मे हन्तुं सौहृदात् प्रणतस्य च ।
अभितश् चागतम् प्रेम्णा प्रत्याख्यातुं न मार्हसि ॥११॥
अनुरूपो हि युक्तश् च त्वम् ममाहं तवापि च ।
स्नुषाम् प्रतीच्छ मे कन्याम् भार्यां सत्यवतः सतः ॥१२॥

॥ द्युमत्सेन उवाच ॥

पूर्वम् एवा ऽभिलषितः सम्बन्धो मे त्वया सह ।
भ्रष्टराज्यस् त्व् अहम् इति तत एतद् विचारितम् ॥ १३ ॥
अभिप्रायस् तु अयं यो मे पूर्वम् एवा ऽभिकाङ्क्षितः ।
स निवृत्तस् त्वया ऽद्यै ऽव काङ्क्षितो ह्य् असि मे ऽतिथिः ॥ १४ ॥

॥ मार्कण्डेय उवाच ॥

ततः सर्वान् समानीय द्विजान् आश्रमवासिनः ।
यथाविधि समुद्वाहं कारयामासतुर् नृपौ ॥ १५ ॥
दत्वा सो ऽश्वपतिः कन्यां यथार्हं च परिच्छदम् ।
ययौ स्वम् एव भवनं युक्तः परमया मुदा ॥ १६ ॥
सत्यवान् अपि तां भार्यां लब्ध्वा सर्वगुणान्विताम् ।
मुमुदे सा ऽपि तं लब्ध्वा भर्तारं मनसे ऽप्सितम् ॥ १७ ॥
गते पितरि सर्वाणि सन्न्यस्या ऽऽभरणानि सा ।
जगृहे वल्कलान्य् एव वस्त्रं काषायम् एव च ॥ १८ ॥
परिचारैर् गुणैश् चै ऽव प्रश्रयेण दमेन च ।
सर्वकामक्रियाभिश् च सर्वेषां तुष्टिम् आवहत् ॥ १९ ॥
श्वश्रूं शरीरसत्कारैः सर्वैर् आच्छादनादिभिः ।
श्वशुरं देवसत्कारैः वाचः संयमनेन च ॥ २० ॥
तथै ऽव प्रियवादेन नैपुण्येन शमेन च ।

रहस्य् चै वो पचारेण भर्तारम् पर्यतोषयत् ॥२१॥
एवं तत्रा ऽश्रमे तेषां सदा निवसतां सताम् ।
कालस् तपस्यतां कश्चिद् अतिचक्राम भारत ॥२२॥
सावित्र्या ग्लायमानायास् तिष्ठन्त्याश् च दिवानिशम् ।
नारदेन यद् उक्तं तद् वाक्यम् मनसि वर्तते ॥२३॥
॥ इति महाभारते सावित्र्युपाख्याने तृतीयः सर्गः ॥३॥

॥ मार्कण्डेय उवाच ॥

ततः काले बहुतिथे व्यतिक्रान्ते कदाचन ।
प्राप्तः स कालो मर्तव्यं यत्र सत्यवता नृप ॥१॥
गणयन्त्याश् च सावित्र्या दिवसे दिवसे गते ।
तद् वाक्यं नारदेनो ऽक्तं वर्तते हृदि नित्यशः ॥२॥
चतुर्थे ऽहनि मर्तव्यम् इति सञ्चिन्त्य भाविनी ।
व्रतं त्रिरात्रम् उद्दिश्य दिवारात्रं स्थिता ऽभवत् ॥३॥
तं श्रुत्वा नियमम् तस्या भृशं दुःखान्वितो नृपः ।
उत्थाय सावित्रीं वाक्यम् अब्रवीत् परिसान्त्वयन् ॥४॥
अतितीव्रो ऽयम् आरम्भस् त्वया ऽरब्धो नृपात्मजे ।
तिसृणां वसतीनां हि स्थानम् परमदुश्चरम् ॥५॥

॥ सावित्र्य् उवाच ॥

न कार्यस् तात संतापस् पारयिष्याम्य् अहं तपः ।
व्यवसायकृतं ही दं व्यवसायश् च कारणम् ॥ ६॥

॥ द्युमत्सेन उवाच ॥

व्रतम् भिन्धी ति वक्तुं त्वां ना स्मि शक्तः कथञ्चन ।
पारयस्वे ति वचनं युक्तम् अस्मद्विधो वदेत् ॥ ७॥

॥ मार्कण्डेय उवाच ॥

एवम् उक्त्वा द्युमत्सेनो विरराम महामनाः ।
तिष्ठन्ती चा पि सावित्री काष्ठभूते व लक्ष्यते ॥ ८॥
श्वो भूते भर्तृमरणे सावित्र्या भरतर्षभ ।
दुःखान्वितायास् तिष्ठन्त्याः सा रात्रिर् व्यत्यवर्तत ॥ ९॥
अद्य तद् दिवसं चे ति हुत्वा शीघ्रं हुताशनम् ।
युगमात्रोदिते सूर्ये कृत्वा पौर्वाह्णिकीः क्रियाः ॥ १०॥
ततः सर्वान् द्विजान् वृद्धान् श्वश्रूं श्वशुरम् एव च ।
अभिवाद्या नुपूर्वेण प्राञ्जलिर् नियता स्थिता ॥ ११॥
अवैधव्या ऽशिषस् ते तु सावित्र्यर्थं हिताः शुभाः ।
ऊचुस् तपस्विनः सर्वे तपोवननिवासिनः ॥ १२॥
एवम् अस्त्व् इति सावित्री ध्यानयोगपरायणा ।
मनसा ता गिरः सर्वाः प्रत्यगृह्णात् तपस्विनाम् ॥ १३॥

तं कालं तम् मुहूर्तं च प्रतीक्षन्ती नृपात्मजा ।
यथोक्तं नारदवचम् चिन्तयन्ती सुदुःखिता ॥१४॥
ततस् तु श्वश्रूश्वशुराव् ऊचतुस् तान् नृपात्मजाम् ।
एकान्तस्थाम् इदं वाक्यम् प्रीत्या भरतसत्तम ॥१५॥
व्रतं यथो 'पदिष्टं वै यथावत् पारितं त्वया ।
आहारकालः सम्प्राप्तस् क्रियतां यद् अनन्तरम् ॥१६॥
॥ सावित्र्य् उवाच ॥
अस्तं गते मया "दित्ये भोक्तव्यं कृतकाम्यया ।
एष मे हृदि सङ्कल्पः समयश् च कृतो मया ॥१७॥
॥ मार्कण्डेय उवाच ॥
एवं सम्भाषमाणायां सावित्र्याम् भोजनम् प्रति ।
स्कन्धे परशुम् आदाय सत्यवान् प्रस्थितो वनम् ॥१८॥
सावित्री आह भर्तारं नै 'कस् त्वं गन्तुम् अर्हसि ।
सह त्वया गमिष्यामि न हि त्वां हातुम् उत्सहे ॥१९॥
॥ सत्यवान् उवाच ॥
वनं न गतपूर्वं ते दुःखपन्था भविष्यति ।
व्रतोपवासक्षामा च कथम् पद्भ्याम् गमिष्यसि ॥२०॥
॥ सावित्र्य् उवाच ॥
उपवासान् न मे ग्लानिर् ना 'स्ति चा 'पि परिश्रमः ।

गमने च कृतोत्साहाम् प्रतिषेद्धुं न मा ऽर्हसि ॥२१॥

॥ सत्यवान् उवाच ॥

यदि ते गमनोत्साहः करिष्यामि तव प्रियम् ।
मम त्व् आमन्त्रय गुरू न मां दोषः स्पृशेद् अयम् ॥२२॥

॥ मार्कण्डेय उवाच ॥

सा ऽभिवाद्या ऽब्रवीच् छ्वश्रूं श्वशुरं च महाव्रता ।
अयं गच्छति भर्ता मे फलाहारो महावनम् ॥२३॥
इच्छेयम् अप्य् अनुज्ञाता आर्यया श्वशुरेण च ।
अनेन सह निर्गन्तुं न हि मे विरहः क्षमः ॥२४॥
गुर्वग्निहोत्रार्थकृते प्रस्थितश् च सुतस् तव ।
न निवार्यो निवार्यः स्याद् अन्यथा प्रस्थितो वनम् ॥२५॥
संवत्सरः किंचिद् ऊनो न निष्क्रान्ता ऽहम् आश्रमात् ।
वनं कुसुमितं द्रष्टुम् परं कौतूहलं हि मे ॥२६॥

॥ द्युमत्सेन उवाच ॥

यतः प्रभृति सावित्री पित्रा दत्ता स्नुषा मम ।
ना ऽनया ऽभ्यर्थनायुक्तम् उक्तम् पूर्वं स्मराम्य् अहम् ॥२७॥
तद् एषा लभतां कामं यथा ऽभिलषितं वधूः ।
अप्रमादश् च कर्तव्यः पुत्रि सत्यवता पथि ॥२८॥

॥ मार्कण्डेय उवाच ॥

उभाभ्याम् अभ्यनुज्ञाता सा जगाम यशस्विनी ।
सह भर्त्रा हसन्ती 'व हृदयेन विदूयता ॥ २९ ॥
सा वनानि विचित्राणि रमणीयानि सर्वशः ।
मयूरगणजुष्टानि ददर्श विपुलेक्षणा ॥ ३० ॥
नदीः पुण्यवहाश् चै 'व पुष्पितांश् च नगोत्तमान् ।
सत्यवान् आह पश्ये 'ति सावित्रीम् मधुरं वचः ॥ ३१ ॥
निरीक्षमाणा भर्तारं सर्वावस्थम् अनिन्दिता ।
मृतम् एव हि तम् मेने काले मुनिवचः स्मरन् ॥ ३२ ॥
अनुवर्तन्ती भर्तारं जगाम मृदुगामिनी ।
द्विधे 'व हृदयं कृत्वा तं च कालम् अवेक्षती ॥ ३३ ॥

॥ इति महाभारते सावित्र्युपाख्याने चतुर्थः सर्गः ॥ ४ ॥

॥ मार्कण्डेय उवाच ॥

अथ भार्यासहायः स फलान्य् आदाय वीर्यवान् ।
कठिनम् पूरयामास ततः काष्ठान्य् अपाटयत् ॥ १ ॥
तस्य पाटयतः काष्ठं स्वेदो वै समजायत ।
व्यायामेन च तेन स्म जज्ञे शिरसि वेदना ॥ २ ॥

सो ऽभिगम्य प्रियाम् भार्याम् उवाच श्रमपीडितः ।
अङ्गानि चै व सावित्रि हृदयं दह्यती व च ॥ ३ ॥
अस्वस्थम् इव चा त्मानं लक्षये मितभाषिणि ।
तत् स्वप्तुम् इच्छे कल्याणि न स्यातुशक्तिर् अस्ति मे ॥ ४ ॥
सा समासाद्य सावित्री भर्तारम् उपगम्य च ।
उत्सङ्गे ऽस्य शिरः कृत्वा निषसाद महीतले ॥ ५ ॥
ततः सा नारदवचो विमृशन्ती तपस्विनी ।
तम् मुहूर्तं क्षणं वेलां दिवसं च युयोज ह ॥ ६ ॥
मुहूर्ताद् एव चा पश्यत् पुरुषं रक्तवाससम् ।
बद्धमौलिं वपुष्मन्तम् आदित्यसमतेजसम् ॥ ७ ॥
श्यामावदातं रक्ताक्षम् पाशहस्तम् भयावहम् ।
स्थितं सत्यवतः पार्श्वे निरीक्षन्तं तम् एव च ॥ ८ ॥
तं दृष्ट्वा सहसो त्थाय भर्तुर् न्यस्य शनैः शिरः ।
कृताञ्जलिर् उवाचा र्ता हृदयेन प्रवेपती ॥ ९ ॥
दैवतं त्वा भिजानामि वपुर् एतद् द्य् अमानुषम् ।
कामया ब्रूहि मे देव कस् त्वं किं च चिकीर्षसि ॥ १० ॥

॥ यम उवाच ॥

पतिव्रता सि सावित्रि तथै व च तपो ऽन्विता ।
अतस् त्वाम् अभिभाषामि विद्धि मां त्वं शुभे यमम् ॥ ११ ॥

अयं ते सत्यवान् भर्ता क्षीणायुः पार्थिवात्मजः ।
नेष्याम्य् एनम् अहम् बध्वा विद्य् एतन् मे चिकीर्षितम् ॥१२॥

॥ सावित्र्य् उवाच ॥

श्रूयते भगवन् दूतास् तव गच्छन्ति मानवान् ।
नेतुं किल भवान् कस्माद् आगतोऽसि स्वयम् प्रभो ॥१३॥

॥ मार्कण्डेय उवाच ॥

इत्य् उक्तः पितृराजस् ताम् भगवान् स्वचिकीर्षितम् ।
यथावत् सर्वम् आख्यातुं तत्प्रियार्थम् प्रचक्रमे ॥१४॥
अयं हि धर्मसंयुक्तो रूपवान् गुणसागरः ।
ना र्हो मत्पुरुषैर् नेतुम् अतोऽस्मि स्वयम् आगतः ॥१५॥
ततः सत्यवतः कायात् पाशबद्धं वशं गतम् ।
अङ्गुष्ठमात्रम् पुरुषं निश्चकर्ष यमो बलात् ॥१६॥
ततः समुद्धृतप्राणं गतश्वासं हतप्रभम् ।
निर्विचेष्टं शरीरं तद् बभूवा ऽप्रियदर्शनम् ।
यमस् तु तं तथा बध्वा प्रयातो दक्षिणामुखः ॥१७॥
सावित्री चा ऽपि दुःखार्त्ता यमम् एवा ऽन्वगच्छत ।
नियमव्रतसम्पन्ना महाभागा पतिव्रता ॥१८॥

॥ यम उवाच ॥

निवर्त गच्छ सावित्रि कुरुष्वा ऽस्यौ ऽर्ध्वदेहिकाम् ।

कृतम् भर्तुस् त्वया ऽऽनृण्यं यावद् गम्यं गतं त्वया ॥ १९ ॥

॥ सावित्र्य् उवाच ॥

यत्र मे नीयते भर्ता स्वयं वा यत्र गच्छति ।
मया ऽपि तत्र गन्तव्यम् एष धर्मः सनातनः ॥ २० ॥
तपसा गुरुभक्त्या च भर्तृस्नेहाद् व्रतेन च ।
तव चै ऽव प्रसादेन न मे प्रतिहता गतिः ॥ २१ ॥
प्राहुः साप्तपदम् मैत्रम् बुधास् तत्त्वार्थदर्शिनः ।
मित्रतां च पुरस्कृत्य किंचिद् वक्ष्यामि तच् छृणु ॥ २२ ॥
ना ऽनात्मवन्तो हि वने चरन्ति धर्मं च सत्यं च प्रतिश्रयं च ।
विज्ञानतो धर्मम् उदाहरन्ति तस्मात् सन्तो धर्मम् आहुः प्रधानं ॥ २३ ॥
एकस्य धर्मेण सताम् मतेन सर्वे स्म तन्मार्गम् अनुप्रपन्नाः ।
मा द्वितीयं मा तृतीयं च वाञ्छे तस्मात् सन्तो धर्मम् आहुः प्रधानम् ॥ २४ ॥

॥ यम उवाच ॥

निवर्त तुष्टो ऽस्मि तवा ऽनया गिरा स्वराक्षरव्यञ्जनहेतुयुक्तया ।
वरं वृणीष्व ऽह विना ऽस्य जीवितं ददानी ऽति सर्वम् अनिन्दिते वरम् ॥ २५ ॥

4*

॥ सावित्र्य् उवाच ॥

च्युतः स्वराज्याद् वनवासम् आश्रितो विनष्टचक्षुः श्वशुरो ममा ऽश्रमे ।

स लब्धचक्षुर् बलवान् भवेन् नृपस् तव प्रसादाज् ज्वलनार्कसन्निभः ॥२६॥

॥ यम उवाच ॥

ददानि ते सर्वम् अनिन्दिते वरं यथा त्वयो ऽक्तम् भविता च तत् तथा ।

तवा ऽध्वनि ग्लानिम् इवो ऽपलक्षये निवर्त गच्छस्व न ते श्रमो भवेत् ॥२७॥

॥ सावित्र्य् उवाच ॥

कुतः श्रमो भर्तृसमीपतो ऽद्य मे यतो हि भर्ता मम सा गतिर् ध्रुवा ।

यतः पतिं नेष्यसि तत्र मे गतिः सुरेश भूयश् च वचो निबोध मे ॥२८॥

सतां सकृत् सङ्गतम् ईप्सितम् परम् ततः परम् मित्रम् इति प्रचक्षते ।

न चा ऽफलं सत्पुरुषेण समागतं ततः सतां सन्निवसेत् समागमे ॥२९॥

॥ यम उवाच ॥
मनोऽनुकूलम् बुद्धबुद्धिवर्द्धनं त्वये दम् उक्तं वचनं हि-
ताश्रयम् ।
विना पुनः सत्यवतोऽस्य जीवितं वरं द्वितीयं वरयस्व
भाविनि ॥३०॥

॥ सावित्र्य् उवाच ॥
हृतम् पुरा मे श्वशुरस्य धीमतः स्वम् एव राज्यं लभतां स
पार्थिवः ।
न च स्वधर्मम् प्रजह्यातु मे गुरुर् द्वितीयम् एतद् वरयामि
ते वरम् ॥३१॥

॥ यम उवाच ॥
स्वम् एव राज्यम् प्रतिपत्स्यतेऽचिरान् न च स्वधर्मात् परि-
हास्यते नृपः ।
कृतेन कामेन मया नृपात्मज निवर्त गच्छस्व न ते श्रमो
भवेत् ॥३२॥

॥ सावित्र्य् उवाच ॥
प्रजास् त्वये ता नियमेन संयुता नियम्य चे ता नयसे न
काम्यया ।

अतो यमत्वं तव देव विश्रुतं निबोध चे मां गिरम् ईरिताम् मया ॥ ३३ ॥

अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च् च दानं च सतां धर्मः सनातनः ॥ ३४ ॥
एवम् प्रायश्च् च लोकोऽयम् मनुष्याः शक्तिपेशलाः ।
सन्तस् त्व् एवा ऽप्य् अमित्रेषु दयाम् प्राप्तेषु कुर्वते ॥ ३५ ॥

॥ यम उवाच ॥

पिपासितस्ये व भवेद् यथा पयस् तथा त्वया वाक्यम् इदं समीरितम् ।
विना पुनः सत्यवतोऽस्य जीवितं वरं वृणीष्वे ह शुभे यद् इच्छसि ॥ ३६ ॥

॥ सावित्र्य् उवाच ॥

ममा ऽनपत्यः पृथिवीपतिः पिता भवेत् पितुः पुत्रशतं तथौ ऽरसम् ।
कुलस्य सन्तानकरं च यद् भवेत् तृतीयम् एतं वरयामि ते वरम् ॥ ३७ ॥

॥ यम उवाच ॥

कुलस्य सन्तानकरं सुवर्चसं शतं सुतानाम् पितुर् अस्तु ते शुभे ।

कृतेन कामेन नराधिपात्मजे निवर्त दूरं हि पथस् त्वम्
आगता ॥ ३८ ॥

॥ सवित्र्य् उवाच ॥

न दूरम् एतन् मम भर्तृसन्निधौ मनो हि मे दूरतरम् प्रधा-
वति ।
अथ व्रजन् एव गिरं समुद्यताम् ममो च्यमानां शृणु भूय
एव च ॥ ३९ ॥
विवस्वतस् त्वं तनयः प्रतापवांस् ततो हि वैवस्वत उच्यसे
बुधैः ।
समेन धर्मेण च रञ्जिताः प्रजास् ततस् तवे ह्े श्वर् धर्मरा-
जता ॥ ४० ॥
आत्मन्य् अपि न विश्वासस् तावान् भवति सत्सु यः ।
तस्मात् सत्सु विशेषेण सर्वः प्रणयम् इच्छति ॥ ४१ ॥
सौहृदात् सर्वभूतानां विश्वासो नाम जायते ।
तस्मात् सत्सु विशेषेण विश्वासं कुरुते जनः ॥ ४२ ॥

॥ यम उवाच ॥

उदाहृतं ते वचनं यद् अङ्गने शुभे न तादृक् त्वद् ऋते मया
श्रुतं ।

अनेन तुष्टो ऽस्मि विना ऽस्य जीवितं वरं चतुर्थं वरयस्व गच्छ च ॥४३॥

॥ सावित्र्य् उवाच ॥

ममा ऽत्मजं सत्यवतस् तथौ ऽरसम् भवेद् उभाभ्याम् इह यत् कुलोद्वहम् ।
शतं सुतानाम् बलानाम् महात्मनाम् इमं चतुर्थं वरयामि ते वरम् ॥४४॥

॥ यम उवाच ॥

शतं सुतानाम् बलवीर्यशालिनाम् भविष्यति प्रीतिकरं तवा ऽबले ।
परिश्रमस् ते न भवेन् नृपात्मजे निवर्त दूरं हि पथस् त्वम् आगता ॥४५॥

॥ सावित्र्य् उवाच ॥

सतां सदा शाश्वती धर्मवृत्तिः सन्तो न सीदन्ति न च व्यथन्ते ।
सतां सद्भिर् ना ऽफलः सङ्गमो ऽस्ति सद्भ्यो भयं ना ऽनुवर्तन्ति सन्तः ॥४६॥
सन्तो हि सत्येन नयन्ति सूर्यं सन्तो भूमिं तपसा धारयन्ति ।
सन्तो गतिर् भूतभव्यस्य राजन् सताम् मध्ये ना ऽवसीदन्ति सन्तः ॥४७॥

आर्यदृष्टम् इदं वृत्तम् इति विज्ञाय शाश्वतम् ।
सन्तः परार्थं कुर्वाणा ना ऽवेक्षन्ते प्रतिक्रियाम् ॥४८॥
न च प्रसादः पुरुषेषु मोघो न चा ऽप्य् अर्थः नश्यति ना ऽपि मानः ।
यस्माद् एतन् नियतं सत्सु नित्यं तस्मात् सन्तो रक्षितारो भवन्ति ॥४९॥

॥ यम उवाच ॥

यथा यथा भाषसि धर्मसम्मितम् मनोऽनुकूलं सुपदम् महार्थवत् ।
तथा तथा मे त्वयि भक्तिर् उत्तमा वरं वृणीष्वा ऽप्रतिमम् पतिव्रते ॥५०॥

॥ सावित्र्य् उवाच ॥

न ते ऽपवर्गः सुकृताद् विना कृतस् तथा यथा ऽन्येषु वरेषु मानद ।
वरं वृणे जीवतु सत्यवान् अयं यथा मृता ह्य् एवम् अहं विना पतिम् ॥५१॥
न कामये भर्तृविनाकृता सुखं न कामये भर्तृविनाकृता दिवम् ।

न कामये भर्तृविनाकृता प्रियं न भर्तृहीना व्यवसामि
जीवितुम् ॥ ५२ ॥
वरातिसर्गः शतपुत्रता मम त्वये 'व मे दत्तो ह्रियते च मे
पतिः ।
वरं वृणे जीवतु सत्यवान् अयं तवै 'व सत्यं वचनम् भवि-
ष्यति ॥ ५३ ॥
तथे 'त्य् उक्त्वा तु तम् पाशम् मुक्त्वा वैवस्वतो यमः ।
धर्मराजा प्रहृष्टात्मा सावित्रीम् इदम् अब्रवीत् ॥ ५४ ॥
एष भर्ता मया मुक्तो भद्रं ते कुलनन्दिनि ।
अरोगः स्थवनेयश् च सिद्धार्थश् च भविष्यति ॥ ५५ ॥
चतुर्वर्षशतं चा 'युस् त्वया सार्द्धम् अवाप्स्यति ।
इष्ट्वा यज्ञैश् च धर्मेण ख्यातिं लोके गमिष्यति ॥ ५६ ॥
त्वयि पुत्रशतं चा 'पि सत्यवान् जनयिष्यति ।
ते चा 'पि सर्वे राजानः क्षत्रियाः पुत्रपौत्रिणः ॥ ५७ ॥
ख्यातास् त्वन्नामधेयाश् च भविष्यन्ती 'ह शाश्वतीः ।
पितुश् च ते पुत्रशतम् भविता तव मातरि ॥ ५८ ॥
मालव्याम् मालवा नाम शाश्वताः पुत्रपौत्रिणः ।
भ्रातरस् ते भविष्यन्ति क्षत्रियास् त्रिदशोपमाः ॥ ५९ ॥
एवं तस्यै वरान् दत्वा धर्मराजः प्रतापवान् ।

निवर्तयित्वा सावित्रीं स्वम् एव भवनं ययौ ॥ ६० ॥
सावित्र्य् अपि यमे याते भर्तारम् प्रतिलभ्य च ।
जगाम तत्र यत्रा ऽस्या भर्तुः शावं कलेवरम् ॥ ६१ ॥
सा भूमौ प्रेक्ष्य भर्तारम् अभिसृत्यो ऽपगृह्य च ।
उत्सङ्गे शिरस् चा ऽऽरोप्य भूमाव् उपविवेश ह ॥ ६२ ॥
सञ्ज्ञां च सत्यवान् लब्ध्वा सावित्रीम् अभ्यभाषत ।
प्रोष्या ऽऽगत इव प्रेम्णा पुनः पुनर् उदीक्ष्य वै ॥ ६३ ॥

॥ सत्यवान् उवाच ॥

सुचिरं वत सुप्तो ऽस्मि किमर्थं ना ऽवबोधितः ।
क्व चा ऽसौ पुरुषः श्यामो यो ऽसौ मां सञ्चकर्ष ह ॥ ६४ ॥

॥ सावित्र्य् उवाच ॥

सुचिरं त्वम् प्रसुप्तो ऽसि ममा ऽङ्के पुरुषर्षभ ।
गतः स भगवान् देवः प्रजासंयमनो यमः ॥ ६५ ॥
विश्रान्तो ऽसि महाभाग विनिद्रश् च नृपात्मज ।
यदि शक्यं समुत्तिष्ठ विगाढाम् पश्य शर्वरीम् ॥ ६६ ॥

॥ मार्कण्डेय उवाच ॥

उपलभ्य ततः सञ्ज्ञां सुखसुप्त इवो ऽत्थितः ।
दिशः सर्वा वनान्तांश् च निरीक्ष्यो ऽवाच सत्यवान् ॥ ६७ ॥

फलाहारोऽस्मि निष्क्रान्तस् त्वया सह सुमध्यमे ।
ततः पाटयतः काष्ठं शिरसो मे रुजा ऽभवत् ॥ ६८ ॥
शिरोऽभितापसन्तप्तः स्थातुं चिरम् अशक्नुवन् ।
तवो ऽत्सङ्गे प्रसुप्तोऽहम् इति सर्वं स्मरे शुभे ॥ ६९ ॥
त्वयो ऽपगूढस्य च मे निद्रया ऽपहृतम् मनः ।
ततोऽपश्यं तमो घोरम् पुरुषं च महौजसम् ॥ ७० ॥
तद् यदि त्वं विजानासि किं तद् ब्रूहि सुमध्यमे ।
स्वप्नो नु स मया दृष्टो यदि वा सत्यम् एव तत् ॥ ७१ ॥
तम् उवाचा ऽथ सावित्री रजनी व्यवगाहते ।
श्वस् ते सर्वं यथावृत्तम् आख्यास्यामि नृपात्मज ॥ ७२ ॥
उत्तिष्ठो ऽत्तिष्ठ भद्रं ते पितरौ पश्य सुव्रत ।
विगाढा रजनी चे ऽयं निवृत्तश् च दिवाकरः ॥ ७३ ॥
नक्तंचराश् चरन्ते ते हृष्टा क्रूराभिभाषिणः ।
श्रूयते पर्णशब्दश् च मृगाणां चरतां वने ॥ ७४ ॥
एता घोरान् शिवा नादान् दिशं दक्षिणपश्चिमाम् ।
आस्थाय विरुवन्त्य् उग्राः कम्पयन्तो मनो मम ॥ ७५ ॥

॥ सत्यवान् उवाच ॥

वनम् प्रतिभयाकारं घोरेण तमसा वृतम् ।
न विज्ञास्यसि पन्थानं गन्तुं चै ऽव न शक्ष्यसि ॥ ७६ ॥

॥ सावित्र्य् उवाच ॥

अस्मिन्न् अद्य वने दग्धे शुष्कवृक्षः स्थितो ज्वलन् ।
वायुना धम्यमानो ऽत्र दृश्यते ऽग्निः क्वचित् क्वचित् ॥७७॥
ततो ऽग्निम् आनयित्वे ह ज्वालयिष्यामि पावकम् ।
काष्ठानी मानि सन्ती ह जहि संतापम् आत्मनः ॥७८॥
यदि नो त्सहसे गन्तुं सरुजं त्वां हि लक्षये ।
न च ज्ञास्यसि पन्थानं तमसा संवृते वने ॥७९॥
श्वः प्रभाते वने दृश्ये यास्यावो ऽनुमते तव ।
वसामि ह क्षपाम् एतां रुचितं यदि ते ऽनघ ॥८०॥

॥ सत्यवान् उवाच ॥

शिरोरुजा निवृत्ता मे स्वस्थान्य् अङ्गानि लक्षये ।
मातापितृभ्याम् इच्छामि सङ्गमं त्वत्प्रसादनात् ॥८१॥
न कदाचिद् विकाले हि गतपूर्वो मया श्रमः ।
अनागतायां सन्ध्यायाम् माता मे संरुणद्धि माम् ॥८२॥
दिवा पि मयि निष्क्रान्ते सन्तप्येते गुरू मम ।
विचिनोति हि मे माता सहै वा श्रमवासिभिः ॥८३॥
मातापित्रा च सुभृशं दुःखिताभ्याम् अहम् पुरा ।
उपालब्धः सुबहुशश् चिरेणा गच्छसी ति ह ॥८४॥
का त्व् अवस्था तयोर् अद्य मदर्थम् इति चिन्तये ।

अदृश्ये मयि ताभ्यां हि महद् दुःखम् भविष्यति ॥ ८५ ॥
पुरा माम् ऊचतुश् चै व रात्राव् उत्थाय मामकौ ।
भृशं सुदुःखितौ वृद्धौ बहुशः प्रीतिसंयतौ ॥ ८६ ॥
त्वया हीनौ न जीविव मुहूर्तम् अपि पुत्रक ।
यावद् धरिष्यसे पुत्र तावन् नौ जीवितं ध्रुवम् ॥ ८७ ॥
वृद्धयोर् अन्धयोर् यष्टि त्वयि वंशः प्रतिष्ठितः ।
त्वयि पिण्डम् च कीर्तिम् च सन्तानं चा ऽवयोर् इति ॥ ८८ ॥
माता वृद्धा पिता ऽप्य् अन्धस् तयोर् यष्टिर् अहं किल ।
तौ रात्रौ माम् अपश्यन्तौ काम् अवस्थां गमिष्यतः ॥ ८९ ॥
निद्रां चै ऽवा ऽभ्यसूयामि यस्या हेतोः पिता मम ।
माता च संशयम् प्राप्ता मत्कृते ऽनपकारिणी ॥ ९० ॥
अहं च संशयम् प्राप्तः कृच्छ्राम् आपदम् आस्थितः ।
मातापितृभ्यां रहितो ना ऽहं जीवितुम् उत्सहे ॥ ९१ ॥
व्यक्तम् आकुलया बुद्ध्या प्रज्ञाचक्षुः पिता मम ।
एकैकम् अस्यां वेलायाम् पृच्छत्य् आश्रमवासिनाम् ॥ ९२ ॥
ना ऽत्मानम् अनुशोचामि यथा ऽहम् पितरं शुभे ।
भर्तारं चा ऽप्य् अनुगताम् मातरम् परिदुर्बलाम् ॥ ९३ ॥
मत्कृतेन हि ताव् अद्य सन्तापम् परम् एष्यतः ।
जीवन्ताव् अनुजीवामि भर्तव्यौ तौ ममे ऽति च ।

तयोः प्रियम् मे कर्तव्यम् इति जानामि चा ऽप्य् अहम् ॥ ९४॥

॥ मार्कण्डेय उवाच ॥

एवम् उक्त्वा स धर्मात्मा गुरुभक्तो गुरुप्रियः ।
उच्छ्रित्य बाहू दुःखार्त्तः सुस्वरम् प्ररुरोद ह ॥ ९५॥
ततो ऽब्रवीत् तथा दृष्ट्वा भर्तारं शोकपीडितम् ।
विमृज्या ऽश्रूणि नेत्राभ्यां सावित्री धर्मचारिणी ॥ ९६॥
यदि मे ऽस्ति तपस् तप्तं यदि दत्तं हुतं यदि ।
श्वश्रूश्वशुरभर्तृणाम् मम क्षेमा ऽस्तु शर्वरी ॥ ९७॥
न स्मराम्य् उक्तपूर्वां वै स्वैरेष्व् अप्य् अनृतां गिरम् ।
तेन सत्येन ताव् अद्य ध्रियेतां श्वशुरौ मम ॥ ९८॥

॥ सत्यवान् उवाच ॥

कामये दर्शनम् पित्रोर् याहि सावित्रि माचिरम् ।
पुरा मातुर् पितुर् वा ऽपि यदि पश्यामि विप्रियम् ।
न जीविष्ये वरारोहे सत्येना ऽत्मानम् आलभे ॥ ९९ ॥
यदि धर्मे च ते बुद्धिर् मां च जीवितुम् इच्छसि ।
मम प्रियं च कर्तव्यं गच्छावा ऽश्रमम् उत्तमम् ॥ १०० ॥

॥ मार्कण्डेय उवाच ॥

सावित्री तत उत्थाय केशान् संयम्य भाविनी ।
पतिम् उत्थापयामास बाहुभ्याम् परिगृह्य वै ॥ १०१ ॥

उत्थाय सत्यवांश् चा ऽपि प्रमृज्या ऽङ्गानि पाणिना ।
दिशः सर्वाः समालोक्य कठिने दृष्टिम् आदधे ॥ १०२ ॥
तम् उवाचा ऽपि सावित्री श्वः फलानि हरिष्यसि ।
योगक्षेमार्थम् एतं ते नेष्यामि परशुं त्व् अहम् ॥ १०३ ॥
कृत्वा कठिनभारं सा वृक्षशाखावलम्बिनम् ।
गृहीत्वा परशुम् भर्तुः सकाशम् पुनर् आगमत् ॥ १०४ ॥
वामे स्कन्धे तु वामोरुर् भर्तुर् बाहुं निवेश्य सा ।
दक्षिणेन परिष्वज्य जगाम मृदुगामिनी ॥ १०५ ॥

॥ सत्यवान् उवाच ॥

अभ्यासगमनाद् भीरु पन्थानो विदिता मम ।
वृक्षान्तरालोकितया ज्योत्स्नया चो ऽपलक्षये ॥ १०६ ॥
आगतौ स्वः पथा येन फलान्य् अवचितानि च ।
यथा ऽऽगतं शुभे गच्छ पन्थानम् मा विचारय ॥ १०७ ॥
पलाशखण्डे चै ऽतस्मिन् पन्था व्यावर्तते द्विधा ।
तस्यो ऽत्तरेण यः पन्थास् तेन गच्छ त्वरस्व च ॥ १०८ ॥
स्वस्थो ऽस्मि बलवान् अस्मि दिदृक्षुः पितराव् उभौ ।
ब्रुवन्न् एव त्वरायुक्तः सम्प्रायाद् आश्रमम् प्रति ॥ १०९ ॥

॥ इति महाभारते सावित्र्युपाख्याने पञ्चमः सर्गः ॥ ५ ॥

॥ मार्कण्डेय उवाच ॥

एतस्मिन्न् एव काले तु द्युमत्सेनो महाबलः ।
लब्धचक्षुः प्रसन्नायां दृष्ट्यां सर्वं ददर्श ह ॥ १ ॥
स सर्वान् आश्रमान् गत्वा शैव्यया सह भार्यया ।
पुत्रहेतोः परमार्त्तिर् जगाम पुरुषर्षभः ॥ २ ॥
ताव् आश्रमान् नदीश् चै व वनानि च सरांसि च ।
तस्यां निशि विचिन्वन्तौ दम्पती परिजग्मतुः ॥ ३ ॥
श्रुत्वा शब्दं तु यं किंचिद् उन्मुखौ सुतशङ्कया ।
सावित्रीसहितोऽभ्येति सत्यवान् इत्य् अभाषताम् ॥ ४ ॥
भिन्नैश् च परुषैः पादैः सव्रणैः शोणितोक्षितैः ।
कुशकण्टकविद्धाङ्गौ उन्मत्ताव् इव धावतः ॥ ५ ॥
ततोऽभिसृत्य तैर् विप्रैः सर्वैर् आश्रमवासिभिः ।
परिवार्य समाश्वास्य समानीतौ स्वम् आश्रमम् ॥ ६ ॥
तत्र भार्यासहायः स वृतो वृद्धैस् तपोधनैः ।
आश्वासितो विचित्रार्थैः पूर्वराज्ञां कथाश्रयैः ॥ ७ ॥
ततस् तौ पुनर् आश्वस्तौ वृद्धौ पुत्रदिदृक्षया ।
बाल्यवृत्तानि पुत्रस्य स्मरन्तौ भृशदुःखितौ ॥ ८ ॥
पुनर् उक्त्वा च करुणां वाचं च शोककर्षितौ ।
हा पुत्र हा साध्वि वधु क्वासि क्वासी त्य् अवदताम् ॥ ९ ॥

॥ ब्राह्मणः सुवर्चा उवाच ॥
यथा ऽस्य भार्या सावित्री तपसा च दमेन च ।
आचारेण च संयुक्ता तथा जीवति सत्यवान् ॥ १० ॥
॥ गौतम उवाच ॥
वेदाः साङ्गा मया ऽधीतास् तपो मे सञ्चितम् महत् ।
कौमारम् ब्रह्मचर्यम् मे गुरवो ऽग्निश् च तोषितः ॥ ११ ॥
समाहितेन तीर्णानि सर्वाण्य् एव व्रतानि च ।
वायुभक्षोपवासश् च कृतो मे विधिवत् सदा ॥ १२ ॥
अनेन तपसा वेद्मि सर्वम् परचिकीर्षितम् ।
सत्यम् एतन् निबोध त्वं ध्रियते सत्यवान् इति ॥ १३ ॥
॥ शिष्य उवाच ॥
उपध्यायस्य मे वक्त्राद् यथा वाक्यं विनिःश्रितम् ।
नै ऽव जातु भवेन् मिथ्या तथा जीवति सत्यवान् ॥ १४ ॥
॥ ऋषय ऊचुः ॥
यथा ऽस्य भार्या सावित्री सर्वैर् एव सुलक्षणैः ।
अवैधव्यकरैर् युक्ता तथा जीवति सत्यवान् ॥ १५ ॥
॥ भरद्वाज उवाच ॥
यथा ऽस्य भार्या सावित्री तपसा च दमेन च ।
आचारेण च संयुक्ता तथा जीवति सत्यवान् ॥ १६ ॥

॥ दाल उवाच ॥

यथा दृष्टिः प्रवृत्ता ते सावित्र्याश् च यथा व्रतम् ।
यथा ˝हारम् अकृत्वा च तथा जीवति सत्यवान् ॥१७॥

॥ माण्डव्य उवाच ॥

यथा वदन्ति शान्तायां दिशि वै मृगपक्षिणः ।
पार्थिवी च प्रवृत्तिस् ते तथा जीवति सत्यवान् ॥१८॥

॥ धौम्य उवाच ॥

सर्वैर् गुणैर् उपेतस् ते यथा पुत्रो जनप्रियः ।
दीर्घायुर्लक्षणोपेतस् तथा जीवति सत्यवान् ॥१९॥

॥ मार्कण्डेय उवाच ॥

एवम् आश्वासितस् तैस् तु सत्यवाग्भिस् तपस्विभिः ।
तांस् तान् विगणयन् अर्थान् ततः स्थिर इवा ऽभवत् ॥२०॥
ततो मुहूर्तात् सावित्री भर्त्रा सत्यवता सह ।
आजगामा ˝श्रमं रात्रौ प्रहृष्टा प्रविवेश ह ॥२१॥

॥ ब्राह्मणा ऊचुः ॥

पुत्रेण सङ्गतं त्वां च चक्षुष्मन्तं निरीक्ष्य च ।
सर्वे वयं वै पृच्छामो वृद्धिं ते पृथिवीपते ॥२२॥
समागमेन पुत्रस्य सावित्र्या दर्शनेन च ।
चक्षुषश् चा ˝त्मनो लाभात् त्रिभिर् दिष्ट्या विवर्धसे ॥२३॥

सर्वैर् अस्माभिर् उक्तं यत् तत् तथा ना ऽत्र संशयः ।
भूयो भूयश् च वृद्धिस् ते क्षिप्रम् एव भविष्यति ॥२४॥
॥ मार्कण्डेय उवाच ॥
ततो ऽग्निं तत्र सञ्ज्वाल्य द्विजास् ते सर्व एव हि ।
उपासाञ्चक्रिरे पार्थ द्युमत्सेनम् महीपतिम् ॥२५॥
शैव्या च सत्यवांश् चै ऽव सावित्री चै ऽकतः स्थिताः ।
सर्वैस् तैर् अभ्यनुज्ञाता विशोकाः समुपाविशन् ॥२६॥
ततो राज्ञा समासीनाः सर्वे ते वनवासिनः ।
जातकौतूहलाः पार्थ पप्रच्छुर् नृपतेः सुतम् ॥२७॥
प्राग् एव ना ऽगतं कस्मात् सभार्येण त्वया विभो ।
विरात्रे चा ऽगतं कस्मात् को ऽनुबन्धश् च ते ऽभवत् ॥२८॥
सन्तापितः पिता माता वयं चै ऽव तथा नृप ।
कस्माद् इति न जानीमस् तत् सर्वं वक्तुम् अर्हसि ॥२९॥
॥ सत्यवान् उवाच ॥
पित्रा ऽहम् अभ्यनुज्ञातः सावित्रीसहितो गतः ।
अथ मे ऽभूच् छिरोदुःखं वने काष्ठानि भिन्दतः ॥३०॥
सुप्तश् चा ऽहं वेद न याचिरम् इत्य् उपलक्षये ।
तावत् कालं न च मया सुप्तपूर्वं कदाचन ॥३१॥
सर्वेषाम् एव भवतां सन्तापो मा भवेद् इति ।

अतो चिरात्रागमनं ना ऽन्यद् अस्ती ऽति कारणम् ॥३२॥

॥ गौतम उवाच ॥

अकस्माच् चक्षुषः प्राप्तिर् द्युमत्सेनस्य ते पितुः ।
ना ऽस्य त्वं कारणं वेत्सि सावित्री वक्तुम् अर्हति ॥३३॥
श्रोतुम् इच्छामि सावित्रि त्वं हि वेत्थ परावरम् ।
त्वां हि जानामि सावित्रि सावित्रीम् इव तेजसा ॥३४॥
त्वम् अत्र हेतुं जानीषे तस्मात् सत्यं निरुच्यताम् ।
रहस्यं यदि ते ना ऽस्ति किञ्चिद् अत्र वदस्व नः ॥३५॥

॥ सावित्र्य् उवाच ॥

एवम् एतद् यथा वेत्थ सङ्कल्पो ना ऽन्यथा हि वः ।
न हि किञ्चिद् रहस्यम् मे श्रूयतां तथ्यम् एव यत् ॥३६॥
मृत्युर् मे भर्तुर् आख्यातो नारदेन महर्षिणा ।
स चा ऽद्य दिवसः प्राप्तस् ततो नै ऽनं जहाम्य् अहम् ॥३७॥
सुप्तं चै ऽनं यमः साक्षाद् उपागच्छत् सकिङ्करः ।
स एनम् अनयद् बद्ध्वा दिशम पितृनिषेविताम् ॥३८॥
अस्तौषं तम् अहं देवं सत्येन वचसा विभुम् ।
पञ्च वै तेन मे दत्ता वराः शृणुत तान् मम ॥३९॥
चक्षुषी च स्वराज्यं च द्वौ वरौ श्वशुरस्य मे ।
लब्धम् पितुः पुत्रशतम् पुत्राणाम् आत्मनः शतम् ॥४०॥

चतुर्वर्षशतायुर् मे लब्धो भर्ता च सत्यवान् ।
भर्तुर् हि जीवनार्थाय मया तीर्णं व्रतं स्थिरम् ॥४१॥
एतत् सत्यम् मया ऽऽख्यातं कारणं विस्तरेण वः ।
यथावृत्तं सुखोदर्कम् इदं दुःखम् महन् मम ॥४२॥

॥ ऋषय ऊचुः ॥

निमज्जमानं व्यसनैर् अभिद्रुतं कुलं नरेन्द्रस्य तमोमये ह्रदे ।
त्वया सुशीलव्रतदमयुक्तया समुद्धृतं साध्वि पुनः कुलीनया ॥४३॥

॥ मार्कण्डेय उवाच ॥

तथा प्रशस्य ह्य् अभिपूज्य चै 'व ते वरस्त्रियं ताम् ऋषयः समागताः ।
नरेन्द्रम् आमन्त्र्य सपुत्रम् अञ्जसा शिवेन जग्मुर् मुदिताः स्वम् आलयम् ॥४४॥

॥ इति महाभारते सावित्र्युपाख्याने षष्टः सर्गः ॥६॥

॥ मार्कण्डेय उवाच ॥

तस्यां रात्र्यां व्यतीतायाम् उदिते सूर्यमण्डले ।
कृतपौर्वाह्णिकाः सर्वे समीयुस् ते तपोधनाः ॥१॥
तद् एव सर्वं सावित्र्या महाभाग्यम् महर्षयः ।

द्युमत्सेनाय ना ऽतृप्यन् कथयन्तः पुनः पुनः ॥ २ ॥
ततः प्रकृतयः सर्वाः शाल्वेभ्यो ऽभ्यागता नृप ।
ग्राचख्युर् निहतं चै ऽव स्वेना ऽमात्येन तं द्विषम् ॥ ३ ॥
तम् मन्त्रिणा हतं श्रुत्वा ससहायं सबान्धवम् ।
न्यवेदयन् यथावृत्तं विद्रुतं च द्विषद्बलम् ॥ ४ ॥
एकामत्यं च सर्वस्य जनस्या ऽथीन् नृपम् प्रति ।
सचक्षुर् वा ऽप्य् अचक्षुर् वा स नो राजा भवत्व् इति ॥ ५ ॥
अनेन निश्चयेने ऽह वयम् प्रस्थापिता नृप ।
प्राप्तानी ऽमानि यानानि चतुरङ्गं च ते बलम् ॥ ६ ॥
प्रयाहि राजन् भद्रं ते तुष्टस् ते नगरे जयः ।
अध्यास्व चिररात्राय पितृपैतामहम् पदम् ॥ ७ ॥
चक्षुष्मन्तं तु तं दृष्ट्वा राजानं वपुषा ऽन्वितम् ।
मूर्ध्ना निपतिताः सर्वे विस्मयोत्फुल्ललोचनाः ॥ ८ ॥
ततो ऽभिवाद्य तान् वृद्धान् द्विजान् आश्रमवासिनः ।
तैश् चा ऽभिपूजितः सर्वैः प्रययौ नगरम् प्रति ॥ ९ ॥
शैव्या च सह सावित्र्या स्वास्तीर्णेन सुवर्चसा ।
नरयुक्तेन यानेन प्रययौ सेनया वृतः ॥ १० ॥
ततो ऽभिषिषिचुः प्रीत्या द्युमत्सेनम् पुरोहिताः ।
पुत्रं चा ऽस्य महात्मानं यौवराज्ये ऽभ्यषेचयन् ॥ ११ ॥

ततः कालेन महता सावित्र्याः कीर्तिवर्द्धनम् ।
तद्द् वै पुत्रशतं जज्ञे शूराणाम् अविवर्तिनाम् ॥ १२॥
भ्रातॄणां सोदराणां च तथै वा स्या भवच् छतम् ।
मद्राधिपस्या ऽश्वपतेर् मालव्यां सुमहाबलम् ॥ १३॥
एवम् आत्मा पिता माता श्वश्रूः श्वशुर एव च ।
भर्तुः कुलं च सावित्र्या सर्वं कृच्छ्रात् समुद्धृतम् ॥ १४॥
तथै वै षा पि कल्यानी द्रौपदी शीलसम्मता ।
तारयिष्यति वः सर्वान् सावित्री व कुलाङ्गना ॥ १५॥
॥ वैशम्पायन उवाच ॥
एवं स पाण्डवस् तेन अनुज्ञातो महात्मना ।
विशोको विज्वरो राजन् काम्यके न्यवसत् तदा ॥ १६॥
यश् चे दं शृणुयाद्द् भक्त्या सावित्र्याख्यानम् उत्तमम् ।
स सुखी सर्वसिद्धार्थो न दुःखम् प्राप्नुयान् नरः ॥ १७॥
॥ इति महाभारते सावित्र्युपाख्यानं समाप्तम् ॥ ७॥



॥ द्रौपदीप्रमाथः ॥

॥ वैशम्पायन उवाच ॥

तस्मिन् बहुमृगे ऽरण्ये अटमाना महारथाः ।
काम्यके भरतश्रेष्ठा विजह्रुस् ते यथा ऽमराः ॥ १ ॥
प्रेक्षमाणा बहुविधान् वनोद्देशान् समन्ततः ।
यथर्तुकालरम्याश् च वनराजीः सुपुष्पिताः ॥ २ ॥
पाण्डवा मृगयाशीलाश् चरन्तस् तन् महद् वनम् ।
विजह्रुर् इन्द्रप्रतिमाः कञ्चित् कालम् अरिन्दम ॥ ३ ॥
ततस् ते यौगपद्येन ययुः सर्वे चतुर्दिशम् ।
मृगयाम् पुरुषव्याघ्रा ब्राह्मणार्थे परन्तपाः ॥ ४ ॥
द्रौपदीम् आश्रमे न्यस्य तृणविन्दोर् अनुज्ञया ।
महर्षेर् दीप्ततपसो धौम्यस्य च पुरोधसः ॥ ५ ॥
ततस् तु राजा सिन्धूनां वार्द्धक्षत्रिर् महायशाः ।
विवाहकामः शाल्वेयान् प्रयातः सो ऽभवत् तदा ॥ ६ ॥

महता परिवर्हेण राजयोग्येन संवृतः ।
राजभिर् बहुभिः सार्द्धम् उपायात् काम्यकं च सः ॥७॥
तत्रा 'पश्यत् प्रियाम् भार्याम् पाण्डवानां यशस्विनीम् ।
तिष्ठन्तीम् आश्रमद्वारि द्रौपदीं निर्जने वने ॥८॥
विभ्राजमानां वपुषा बिभ्रतीं रूपम् उत्तमम् ।
भ्राजयन्तीं वनोद्देशं नीलाभ्रम् इव विद्युतम् ॥९॥
अप्सरा देवकन्या वा माया वा देवनिर्मिता ।
इति कृत्वा 'ञ्जलिं सर्वे ददृशुस् ताम् अनिन्दिताम् ॥१०॥
ततः स राजा सिन्धूनां वार्द्धक्षत्रिर् जयद्रथः ।
विस्मितस् त्व् अनवद्याङ्गीं दृष्ट्वा "सीत् दुष्टमानसः ॥११॥
स कोटिकाश्यं राजानम् अब्रवीत् काममोहितः ।
कस्य त्व् एषा 'नवद्याङ्गी यदि वा 'पि न मानुषी ॥१२॥
विवाहार्थो न मे कश्चिद् इमाम् प्राप्या 'तिसुन्दरीम् ।
एताम् एवा 'हम् आदाय गमिष्यामि स्वम् आलयम् ॥१३॥
गच्छ जानीहि सौम्यै 'नां कस्य वा 'त्र कुतो ऽपि वा ।
किमर्थम् आगता सुभ्रूर् इदं कण्टकितं वनम् ॥१४॥
अपि नाम वरारोहा माम् एवा "लोक्य सुन्दरी ।
भजेद् अद्या "यतापाङ्गी सुदती तनुमध्यमा ॥१५॥
अप्य् अहं कृतकामः स्याम् इमाम् प्राप्य वरस्त्रियम् ।

गच्छ जानीहि को न्व् अस्या नाथ इत्य् एव कोटिक ॥१६॥
स कोटिकाश्यस् तच् छ्रुत्वा रथात् प्रस्कन्द्य कुण्डली ।
उपेत्य पप्रच्छ तदा क्रोष्टा व्याघ्रवधूम् इव ॥१७॥
॥ इति महाभारते द्रौपदीप्रमाथे प्रथमः सर्गः ॥१॥

॥ कोटिक उवाच ॥

का त्वं कदम्बस्य विनाम्य शाखाम् एका ऽश्रमे तिष्ठसि शोभमाना ।
देदीप्यमानाग्निशिखे व नक्तं दोधूयमाना पवनेन सुभ्रु ॥१॥
अतीव रूपेण समन्विता त्वं न चा ऽप्य् अरण्येषु बिभेषि किं नु ।
देवी नु यक्षी यदि दानवी वा वराप्सरा दैत्यवराङ्गना वा ॥२॥
वपुष्मती वो ऽरगराजकन्या वनेचरी वा क्षणदाचरस्त्री ।
यद्य् एव राज्ञो वरुणस्य पत्नी यमस्य सोमस्य धनेश्वरस्य ॥३॥
धातुर् विधातुः सवितुर् विभोर् वा शक्रस्य वा त्वं सदनात् प्रपन्ना ।
न ह्य् एव नः पृच्छसि ये वयं स्म न चा ऽपि जानीम तवे ऽह नाथम् ॥४॥
वयं हि मानं तव वर्द्धयन्तः पृच्छाम भद्रे प्रभवम् प्रभुं च ।

आचक्ष्व बन्धूंश् च पतिं कुलं च तत्त्वेन यच् चे ऽह करोषि
कार्यम् ॥५॥
अहं तु राज्ञः सुरथस्य पुत्रो यं कोटिकाश्ये ऽति विदुर् मनु-
ष्याः ॥६॥
असौ तु यस् तिष्ठति काञ्चनाङ्गे रथे हुतोऽग्निश् चयने यथै ऽव ।
त्रिगर्तराजः कमलायताक्षः क्षेमङ्करो नाम स एष वीरः ॥७॥
अस्मात् परस् त्व् एष महाधनुष्मान् पुत्रः कलिङ्गाधिपतेर्
वरिष्ठः ।
निरीक्षते त्वां विपुलायताक्षः सुविस्मितः पर्वतवासनित्यः ॥८॥
असौ तु यः पुष्करिणीसमीपे श्यामो युवा तिष्ठति दर्शनीयः ।
इक्ष्वाकुराज्ञः सुबलस्य पुत्रः स एष हन्ता द्विषतां सुगात्रि ॥९॥
यस्या ऽनुयात्रां ध्वजिनः प्रयान्ति सौवीरका द्वादश राजपुत्राः ।
शोणाश्वयुक्तेषु रथेषु सर्वे मखेषु दीप्ता इव हव्यवाहाः ॥१०॥
अङ्गारकः कुञ्जरो गुप्तकश् च शत्रुञ्जयः सृञ्जयसुप्रवृद्धौ ।
भयङ्करोऽथ भ्रमरो रविश् च शूरः प्रतापः कुहनश् च नाम ॥११॥
यं षट् सहस्रा रथिनो ऽनुयान्ति नागा हयाश् चै ऽव पदाति-
नश् च ।
जयद्रथो नाम यदि श्रुतस् ते सौवीरराजः सुभगे स एषः ॥१२॥
तस्या ऽपरे भ्रातरो ऽदीनसत्त्वा बलाहकानीकविदारणाद्याः ।

सौवीरवीराः प्रवरा युवानो राजानम् एते बलिनो ऽनु-
यान्ति ॥१३॥
एतैः सहायैर् उपयाति राजा मरुद्गणैर् इन्द्र इवा ऽभिगुप्तः ।
अजानतां ख्यापय नः सुकेशि कस्या ऽसि भार्या दुहिता च
कस्य ॥१४॥

॥ इति महाभारते द्रौपदीप्रमाथे द्वितीयः सर्गः ॥२॥

॥ वैशम्पायन उवाच ॥

अथा ऽब्रवीद् द्रौपदी राजपुत्री पृष्टा शिवीनाम् प्रवरेण तेन ।
अवेक्ष्य मन्दम् प्रविमुच्य शाखां सङ्गृह्णती कौशिकम् उत्त-
रीयम् ॥१॥
बुद्ध्या ऽभिजानामि नरेन्द्रपुत्र न मादृशी त्वाम् अभिभाष्टुम्
अर्हति ।
न त्व् एव वक्ता ऽस्ति तवे ऽह वाक्यम् अन्यो नरो वा ऽप्य्
अथ वा ऽपि नारी ॥२॥
एका ह्य् अहं संप्रति तेन वाचं ददानि वै भद्र निबोध चे ऽदम् ।
अहं ह्य् अरण्ये कथम् एकम् एका त्वाम् आलपेयं निरता
स्वधर्मे ॥३॥

जानामि च त्वां सुरथस्य पुत्रं यं कोटिकाश्ये 'ति विदुर् मनु-
ष्याः ।
तस्माद् अहं शैब्य तथै 'व तुभ्यम् आख्यामि बन्धून् प्रथितं
कुलं च ॥४॥
अपत्यम् अस्मि द्रुपदस्य राज्ञः कृष्णे 'ति मां शैब्य विदुर् मनु-
ष्याः ।
सा 'हं वृणे पञ्च जनान् पतित्वे ये खाण्डवप्रस्थं गताः
श्रुतास् ते ॥५॥
युधिष्ठिरो भीमसेनार्जुनौ च माद्र्याश् च पुत्रौ पुरुषप्रवीरौ ।
ते मां निवेश्ये 'ह दिशश् चतस्रो वै भज्य पार्था मृगयाम्
प्रयाताः ॥६॥
प्राचीं राजा दक्षिणाम् भीमसेनो जयः प्रतीचीं यमजाव्
उदीचीम् ।
मन्ये तु तेषां रथसत्तमानां कालो ऽभितः प्राप्त इहो 'पया-
तुम् ॥७॥
सम्मानिता यास्यथ तैर् यथे 'ष्टं विमुच्य वाहान् अवरोहय-
ध्वम् ।
प्रियातिथिर् धर्मसुतो महात्मा प्रीतो भविष्यत्य् अभिवीक्ष्य
युष्मान् ॥८॥

एतावद् उक्का द्रुपदात्मजा सा शैव्यात्मजं चन्द्रमुखी प्रतीता ।
विवेश ताम् पर्णशालाम् प्रशस्तां सञ्चिन्त्य तेषाम् अतिथि-
त्वधर्मम् ॥ १ ॥

॥ इति महाभारते द्रौपदीप्रमाथे तृतीयः सर्गः ॥ ३ ॥

॥ वैशम्पायन उवाच ॥

तथा "सीनेषु सर्वेषु तेषु राजसु भारत ।
यद् उक्तं कृष्णया सार्द्धं तत् सर्वम् प्रत्यवेदयत् ॥ १ ॥
कोटिकाश्यवचः श्रुत्वा शैव्यं सौवीरकोऽब्रवीत् ॥ २ ॥
यदा वाचं व्याहरन्त्याम् अस्याम् मे रमते मनः ।
सीमन्तिनीनाम् मुख्यायां विनिर्वृत्तः कथम् भवान् ॥ ३ ॥
एतां दृष्ट्वा स्त्रियो मेऽन्या यथा शाखामृगस्त्रियः ।
प्रतिभान्ति महाबाहो सत्यम् एतद् ब्रवीमि ते ॥ ४ ॥
दर्शनाद् एव हि मनस् तया मे ऽपहृतम् भृशम् ।
तां समाचक्ष्व कल्याणीं यदि स्याच् छैब्य मानुषी ॥ ५ ॥

॥ कोटिक उवाच ॥

एषा वै द्रौपदी कृष्णा राजपुत्री यशस्विनी ।
पञ्चानाम् पाण्डुपुत्राणाम् महिषी सम्मता भृशम् ॥ ६ ॥

सर्वेषां चै 'व पार्थानाम् प्रिया बहुमता सती ।
तया समेत्य सौवीर सौवीराभिमुखो व्रज ॥ ७ ॥

॥ वैशम्पायन उवाच ॥

एवम् उक्तः प्रत्युवाच पश्यामो द्रौपदीम् इति ।
पतिः सौवीरसिन्धूनां दुष्टभावो जयद्रथः ॥ ८ ॥
स प्रविश्या 'श्रमम् पुण्यं सिंहगोष्ठं वृको यथा ।
आत्मना सप्तमः कृष्णाम् इदं वचनम् अब्रवीत् ॥ ९ ॥
कुशलं ते वरारोहे भर्तारस् ते ऽप्य् अनामयाः ।
येषां कुशलकामा 'सि ते ऽपि कच्चिद् अनामयाः ॥ १० ॥

॥ द्रौपद्य् उवाच ॥

अपि ते कुशलं राजन् राष्ट्रे कोशे बले तथा ॥ ११ ॥
कच्चिद् एकः शिबी नाढ्यान् सौवीरान् सह सिन्धुभिः ।
अनुतिष्ठसि धर्मेण ये चा 'न्ये विदितास् त्वया ॥ १२ ॥
कौरव्यः कुशली राजा कुन्तीपुत्रो युधिष्ठिरः ।
अहं च भ्रातरश् चा 'स्य यांश् चा 'न्यान् परिपृच्छसि ॥ १३ ॥
पाद्यम् परिगृहाणे 'दम् आसनं च नृपात्मज ॥ १४ ॥
ऐणेयान् पृषतान् न्यङ्कून् हरिणान् शरभान् शशान् ।
ऋश्यान् रुरून् शम्बरांश् च गवयांश् च मृगान् बहून् ॥ १५ ॥
वराहान् महिषांश् चै 'व याश् चा 'न्या मृगजातयः ।

प्रदास्यति स्वयं तुभ्यं कुन्तीपुत्रो युधिष्ठिरः ॥१६॥

॥ जयद्रथ उवाच ॥

कुशलम् प्रातराशस्य सर्वम् मे दित्सितं त्वया ।
एहि मे रथम् आरोह सुखम् आप्नुहि केवलम् ॥१७॥
गतश्रीकान् हृतराज्यान् कृपणान् गतचेतसः ।
अरण्यवासिनः पार्थान् ना ऽनुरोद्धुं त्वम् अर्हसि ॥१८॥
न वै प्राज्ञा गतश्रीकम् भर्तारम् उपयुञ्जते ।
युञ्जानम् उपयुञ्जीत न श्रियः प्रक्षये वसेत् ॥१९॥
श्रिया विहीना राष्ट्राच् च विनष्टाः शाश्वतीः समाः ।
अलं ते पाण्डुपुत्राणाम् भक्त्या क्लेशम् उपासितुम् ॥२०॥
भार्या मे भव सुश्रोणि त्यजै ऽनान् सुखम् आप्नुहि ।
अखिलान् सिन्धुसौवीरान् आप्नुहि त्वम् मया सह ॥२१॥

॥ वैशम्पायन उवाच ॥

इत्य् उक्ता सिन्धुराजेन वाक्यं हृदयकम्पनम् ।
कृष्णा तस्माद् अपाक्रामद् देशात् सभ्रुकुटीमुखी ॥२२॥
अवमत्या ऽस्य तद् वाक्यम् आक्षिप्य च सुमध्यमा ।
मै ऽवम् इत्य् अब्रवीत् कृष्णा लज्जस्वे ऽति च सैन्धवम् ॥२३॥
सा काङ्क्षमाणा भर्तॄणाम् उपायातम् अनिन्दिता ।

विलोभयामास परं वाक्यैर् वाक्यानि योजती ॥ २४ ॥
॥ इति महाभारते द्रौपदीप्रमाथे चतुर्थः सर्गः ॥ ४ ॥

॥ वैशम्पायन उवाच ॥

स रोषरागोपहतेन वल्गुना सरागनेत्रेण नतोन्नतभ्रुवा ।
मुखेन विस्फूर्य सुवीरराष्ट्रपं ततोऽब्रवीत् तं द्रुपदात्मजा पुनः ॥१॥
यशस्विनस् तीक्ष्णविषान् महारथान् अतिब्रुवन् मूढ न लज्जसे कथम् ।
महेन्द्रकल्पान् निरतान् स्वकर्मसु स्थितान् समूहेष्व् अपि यक्षरक्षसाम् ॥ २ ॥
न किञ्चिद् ईड्यम् प्रवदन्ति पापा वनेचरं वा गृहमेधिनं वा ।
तपस्विनं सम्परिपूर्णविद्यम् भाषन्ति है 'वं श्वनराः सुवीर ॥३॥
अहं तु मन्ये तव ना 'स्ति कश्चिद् एतादृशे क्षत्रियसन्निवेशे ।
यस् त्वा 'द्य पातालमुखे पतन्तम् पाणौ गृहीत्वा प्रतिसंहरेत ॥४॥
नागम् प्रभिन्नं गिरिकूटकल्पम् उपत्यकां हैमवतीं चरन्तम् ।
दण्डी 'व यूथाद् अपसेधसि त्वं यो जेतुम् आशंससि धर्मराजम् ॥५॥
बाल्यात् प्रसुप्तस्य महाबलस्य सिंहस्य पक्ष्माणि मुखाल् लुनासि ।

यदा समाहृत्य पलायमानः क्रुद्धं यदा द्रक्ष्यसि भीमसेनम् ॥६॥
महाबलं घोरतरम् प्रवृद्धं जातं हरिं पर्वतकन्दरेषु ।
प्रसुप्तम् उग्रम् प्रपदेन हंसि यः क्रुद्धम् आयोत्स्यसि जिष्णुम्
उग्रम् ॥७॥
कृष्णोरगौ तीक्ष्णमुखौ द्विजिह्वौ मत्तः पदा ऽक्रामसि पुच्छदेशे ।
यः पाण्डवाभ्याम् पुरुषोत्तमाभ्यां जघन्यजाभ्याम् प्रयुयुत्स-
से त्वम् ॥८॥
यथा च वेणुः कदली नलो वा फलन्त्य् अभावाय न भूतये
ऽत्मनः ।
तथै 'व मां तैः परिरक्ष्यमाणाम् आदास्यसे कर्कटकी 'व
गर्भम् ॥९॥

॥ जयद्रथ उवाच ॥

जानामि कृष्णे विदितम् ममै 'तद् यथाविधास् ते नरदेवपुत्राः ।
न त्व् एव मे तेन बिभीषणेन शक्या वयं त्रासयितुं त्वया 'द्य ॥१०॥
वयम् पुनः सप्तदशेषु कृष्णे कुलेषु सर्वे ऽनवमेषु जाताः ।
षड्भ्यो गुणेभ्यो ऽभ्यधिका विहीनान् मन्यामहे द्रौपदि पा-
ण्डुपुत्रान् ॥११॥
सा क्षिप्रम् आतिष्ठ गजं रथं वा न वाक्यमात्रेण वयं हि शक्याः ।
आशंस वा त्वं कृपणं वदन्ती सौवीरराजस्य पुनः प्रसादम् ॥१२॥

॥ द्रौपद्य् उवाच ॥

महाबला किं न्व् इह दुर्बले ऽव सौवीरराजस्य मता ऽहम् अस्मि ।
ना ऽहं प्रमाथाद् इह सम्प्रतीता सौवीरराज कृपणं वदेयम् ॥१३॥
यस्या हि कृष्णौ पदवीं चरेतां समास्थिताव् एकरथे समेतौ ।
इन्द्रो ऽपि तां ना ऽपहरेत् कथञ्चित् मनुष्यमात्रः कृपणः कुतो ऽन्यः ॥१४॥
यथा किरीटी परवीरघाती निघ्नन् रथस्थो द्विषताम् मनांसि ।
मदन्तरे त्वद्ध्वजिनीम् प्रवेष्टा कक्षं दहन्न् अग्निर् इवो ऽष्णगेषु ॥१५॥
जनार्दनश् चा ऽन्धकवृष्णिवीरो महेष्वासाः कैकयाश् चा ऽपि सर्वे ।
एते हि सर्वे मम राजपुत्राः प्रहृष्टरूपाः पदवीं चरेयुः ॥१६॥
मौर्वीविसृष्टाः स्तनयित्नुघोषाः गाण्डीवमुक्तास् त्व् अतिवेगवन्तः ।
हस्तं समाहत्य धनंजयस्य भीमाः शब्दा घोरतरं नदन्ति ॥१७॥
गाण्डीवमुक्तांश् च महाशरौघान् पतङ्गसङ्घान् इव शीघ्रवेगान् ।
यदा द्रष्टास्य् अर्जुनेन प्रयुक्तांस् तदा स्वबुद्धिम् प्रतिनिन्दितासि ॥१८॥

सशङ्खघोषः सतलत्रघोषो गाण्डीवधन्वा मुहुर् उदक्रस्य् च ।
यदा शरान् अर्पयिता तवो ऽरसि तदा मनस् ते किम् इवा
भविष्यत् ॥ १९ ॥
गदाहस्तम् भीमम् अभिद्रवन्तम् माद्रीपुत्रौ सम्पतन्तौ दिशश् च ।
अमर्षजं क्रोधविषं वमन्तौ दृष्ट्वा चिरं तापम् उपैष्यसे ऽधम॥२०॥
यथा चा ऽहं ना ऽतिचरे कथञ्चित् पतीन् महार्हान् मनसा
ऽपि जातु ।
तेना ऽद्य सत्येन वशीकृतं त्वां द्रष्टास्मि पार्थैः परिकृष्यमा-
णम् ॥ २१ ॥
न सम्भ्रमं गन्तुम् अहं हि शक्या त्वया नृशंसेन विकृष्यमाणा ।
समागता ऽहं हि कुरुप्रवीरैः पुनर् वनं काम्यकम् आगता
ऽस्मि ॥ २२ ॥

॥ वैशम्पायन उवाच ॥

सा तान् अनुप्रेक्ष्य विशालनेत्रा जिघृक्षमाणान् अवभर्त्स-
यन्ती ।
प्रोवाच मा मा स्पृशते ऽति भीता धौम्यम् प्रचुक्रोश पुरोहितं
सा ॥ २३ ॥
जग्राह ताम् उत्तरवस्त्रदेशे जयद्रथस् तं समवाक्षिपत् सा ।
तया समाक्षिप्ततनुः स पापः पपात शाखी ऽव निकृत्तमूलः ॥२४॥

प्रगृह्यमाणा तु महाजवेन मुहुर् विनिःश्वस्य च राजपुत्री ।
सा कृष्यमाणा रथम् आरुरोह धौम्यस्य पादाव् अभिवाद्य कृत्वा ॥२५॥

॥ धौम्य उवाच ॥

ने यं शक्या त्वया नेतुम् अविजित्य महारथान् ।
धर्मं क्षत्रस्य पौराणाम् अवेक्षस्व जयद्रथ ॥२६॥
क्षुद्रं कृत्वा फलम् पापं त्वं प्राप्स्यसि न संशयः ।
आसाद्य पाण्डवान् वीरान् धर्मराजपुरोगमान् ॥२७॥
इत्य् उक्त्वा ह्रियमाणां तां राजपुत्रीं यशस्विनीम् ।
अन्वगच्छत् तदा धौम्यः पदातिगणमध्यगः ॥२८॥
॥ इति महाभारते द्रौपदीप्रमाथे पञ्चमः सर्गः ॥५॥

॥ वैशम्पायन उवाच ॥

ततो दिशः सम्प्रविहृत्य पार्था मृगान् वराहान् महिषांश् च हत्वा ।
धनुर्धराः श्रेष्ठतमाः पृथिव्याम् पृथक् चरन्तः सहिता बभूवुः ॥१॥
ततो मृगव्यालगणानुकीर्णम् महावनं तद् विहगोपघुष्टम् ।
भ्रातॄंश्च तान् अभ्यवद द् युधिष्ठिरः श्रुत्वा गिरो व्याहरतां मृगाणां॥

आदित्यदीप्तां दिशम् अभ्युपेत्य मृगा द्विजाः क्रूरम् इमे वदन्ति ।
आयासम् उग्रम् प्रतिवेदयन्तो महावनं शत्रुभिर् वाध्यमानम्॥३॥
क्षिप्रं निवर्तध्वम् अलम् मृगैन मनो हि मे दूयति दह्यते च ।
बुद्धिं समाछाद्य च मे समन्युर् उद्धूयते प्राणपतिः शरीरे ॥४॥
सरः सुपर्णेन हृतोरगं यथा राष्ट्रं यथा राजकम् आत्तलक्ष्मि ।
एवंविधम् मे प्रतिभाति काम्यकं शौण्डैर् यथा पीतरसश् च
कुम्भः ॥५॥
ते सैन्धवैर् अत्यनिलौघवेगैर् महाजवैर् वाजिभिर् उह्य-
मानाः ।
युक्तैर् वृहद्भिः सुरथैर् नृवीरास् तदा ऽश्रमाया ऽभिमुखा बभू-
वुः ॥६॥
तेषां तु गोमायुर् अनल्पघोषो निवर्ततां वामम् उपेत्य पार्श्वम्।
प्रत्याहरत् तत् प्रविमृश्य राजा प्रोवाच भीमं च धनञ्जयं
च ॥७॥
यथा वदत्य् एष विहीनयोनिः शालावृको वामम् उपेत्य
पार्श्वम् ।
सुव्यक्तम् अस्मान् अवमन्य पापैः कृतो ऽभिमर्दः कुरुभिः
प्रसह्य ॥८॥
इत्य् एव ते तद् वनम् आविशन्तो महत्य् अरण्ये मृगयां चरित्वा।

बालाम् अपश्यन्त तदा रुदन्तीं धात्रेयिकाम् प्रेष्यवधूम् प्रियायाः ॥ ९ ॥
ताम् इन्द्रसेनस् त्वरितो ऽभिसृत्य रथाद् अवप्लुत्य ततो ऽभ्यधावत् ।
प्रोवाच चै 'नां वचनं नरेन्द्र धात्रेयिकाम् आर्त्ततरस् तदानीम् ॥ १० ॥
किं रोदिषि त्वं पतिता धरण्यां किं ते मुखं शुष्यति दीनवर्णम् ॥ ११ ॥
कच्चिन् न पापैः सुनृशंसकृद्भिः प्रमाथिता द्रौपदी राजपुत्री ।
अचिन्त्यरूपा सुविशालनेत्रा शरीरतुल्या कुरुपुङ्गवानाम् ॥ १२ ॥
यद्य् एव देवी पृथिवीम् प्रविष्टा दिवम् प्रपन्ना 'प्य् अथवा समुद्रम् ।
तस्या गमिष्यन्ति पदं हि पार्थास् तथा हि सन्तप्यति धर्मपुत्रः ॥ १३ ॥
को हि 'दृशानाम् अरिमर्दनानां क्लेशक्षमाणाम् अपराजितानाम् ।
प्राणैः समाम् इष्टतमां जिहीर्षेद् अनुत्तमं रत्नम् इव प्रमूढः ॥ १४ ॥
न बुध्यते नाथवतीम् इहा 'द्य बहिश्चरं हृदयम् पाण्डवानाम् ।

कस्या ऽद्य कायम् प्रतिभिद्य घोरा मही्म् प्रवेक्ष्यन्ति शिवाः
शराग्र्याः ॥ १५ ॥
मा त्वं शुचस् ताम् प्रति भीरु विद्धि यथा ऽद्य कृष्णा पुनर्
एष्यती ऽति ।
निहत्य सर्वान् द्विषतः समग्रान् पार्थाः समेष्यन्त्य् अथ
याज्ञसेन्या ॥ १६ ॥
अथा ऽब्रवीच् चारुमुखं विमृज्य धात्रेयिका सारथिम् इन्द्रसेनं ।
जयद्रथेना ऽपहृता प्रमथ्य पञ्चेन्द्रकल्पान् परिभूय कृष्णा ॥१७॥
तिष्ठन्ति वर्त्मानि नवान्य् अमूनि वृक्षाश् च लम्बन्ति तथै
ऽव भग्नाः ।
आवर्तयध्वं ह्य् अनुयात शीघ्रं न दूरयाती ऽव हि राजपुत्री ॥१८॥
संनह्यध्वं सर्व एवे ऽन्द्रकल्पा महान्ति चापानि च दंशितानि ।
गृहीत चापानि महाधनानि शरांश् च शीघ्रम् पदवीं चर-
ध्वम् ॥ १९ ॥
पुरा हि निर्भर्त्सनदण्डमोहिता प्रमोहचित्ता वदनेन शुष्यता ।
ददाति कस्मैचिद् अनर्हते तनुं वराज्यपूर्णाम् इव भस्मनि
स्रुचम् ॥ २० ॥
पुरा तुषाग्नाव् इव हूयते हविः पुरा श्मशाने स्रग् इवो
ऽपविध्यते ।

पुरा च सोमो ऽध्वरगो ऽवलिह्यते शुना यथा विप्रजने प्रमो-
हिते ॥ २१ ॥
मह्हत्य् अरण्ये मृगयां चरित्वा पुरा शृगालो नलिनीं वि-
गाह्हते ।
मा वः प्रियायाः सुनसं सुलोचनं चन्द्रप्रभाभं वदनम् प्र-
सन्नम् ॥ २२ ॥
स्पृश्याच् छुभं कश्चिद् अकृत्यकारी श्वा वै पुरोडाशम् इवा-
ध्वरस्थम् ।
एतानि वर्त्मान्य् अनुयात शीघ्रम् मा वः कालः क्षिप्रम्
इहा त्यगाद् वै ॥ २३ ॥

॥ युधिष्ठिर उवाच ॥

भद्रे प्रतिक्राम नियच्छ वाचं मा ऽस्मत्सकाशे परुषाण्य् अवोचः ।
राजानो वा यदि वा राजपुत्रा बलेन मत्ता वञ्चनं प्राप्नुवन्ति ॥ २४ ॥

॥ वैशम्पायन उवाच ॥

एतावद् उक्त्वा प्रययुर् हि शीघ्रं तान्य् एव वर्त्मान्य् अनु-
वर्तमानाः ।
मुहुर्मुहुर् व्यालवद् उच्छ्वसन्तो ज्यां विक्षिपन्तश् च महा-
धनुर्भ्यः ॥ २५ ॥
ततो ऽपश्यंस् तस्य सैन्यस्य रेणुम् उद्धूतं वै वाजिखुरप्रणुन्नम् ।

पदातीनां मध्यगतं च धौम्यं विक्रोशन्तं भीमम् अभिद्रवेति ॥२६॥
ते सान्त्व्य धौम्यम् परिदीनसत्त्वाः सुखम् भवान् एत्व् इति रा-
जपुत्राः ।
श्येना यथै वा मिषसम्प्रयुक्ता जवेन तत्सैन्यम् अथा भ्यधा-
वन् ॥२७॥
तेषां महेन्द्रोपमविक्रमाणां संरब्धानां धर्षणाद् याज्ञसेन्याः ।
क्रोधः प्रजज्वाल जयद्रथं च दृष्ट्वा प्रियां तस्य रथे स्थितां च ॥२८॥
प्रचुक्रुशुश् चा प्य् अथ सिन्धुराजं वृकोदरश् चै व धनंजयश् च ।
यमौ च राजा च महाधनुर्धरास् ततो दिशः संमुमुहुः परेषां ॥२९॥
॥ इति महाभारते द्रौपदीप्रमाथे षष्टः सर्गः ॥ ६ ॥

॥ वैशम्पायन उवाच ॥
ततो घोरतरः शब्दो वने समभवत् तदा ।
भीमसेनार्जुनौ दृष्ट्वा क्षत्रियाणाम् अमर्षिणाम् ॥ १ ॥
तेषां ध्वजाग्राण्य् अभिवीक्ष्य राजा स्वयं दुरात्मा कुरुपुङ्गवानां ।
जयद्रथो याज्ञसेनीम् उवाच रथे स्थितां भानुमतीं हतौजाः ॥२॥
आयान्ती मे पञ्च रथाः महान्तो मन्ये च कृष्णे पतयस् तवे ते ।
सा जानती ख्यापय नः सुकेशि परं परं पाण्डवानाम् रथस्थं ॥३॥

॥ द्रौपद्य् उवाच ॥

किं ते ज्ञातैर् मूढ माहाधनुर्धरैर् अनायुष्यं कर्म कृत्वा ति-
घोरम् ।
एते वीराः पतयो मे समेता न वः शेषः कश्चिद् इहा
स्ति युद्धे ॥४॥
आख्यातव्यं त्व् एव सर्वम् मुमूर्षोर् मया तुभ्यम् पृष्टया
धर्म एषः ।
न मे व्यथा विद्यते त्वद् भयं वा सम्पश्यन्त्याः सानुजं धर्म-
राजम् ॥५॥
यस्य ध्वजाग्रे नदतो मृदङ्गौ नन्दोपनन्दौ मधुरौ युक्तरूपौ ।
एतं स्वधर्मार्थविनिश्चयज्ञं सदा जनाः कृत्यवन्तो ऽनुयान्ति ॥६॥
य एष जाम्बूनदशुद्धगौरः प्रचण्डघोणस् तनुर् आयताक्षः ।
एनं कुरुश्रेष्ठं तम् आनन्दन्ति युधिष्ठिरं धर्मसुतम् पतिम् मे ॥७॥
अप्य् एष शत्रोः शरणागतस्य दद्यात् प्राणान् धर्मचारी
नृवीरः ।
परीप्स् एनम मूढ जवेन भूतये त्वम् आत्मनः प्राञ्जलिर्
न्यस्तशस्त्रः ॥८॥
अथा प्य् एनम् पश्यसि तं रथस्थम् महाभुजं शालम् इव
प्रवृद्धम् ।

सन्दष्टौष्ठम् भ्रुकुटीसंहतभ्रुवं वृकोदरो नाम पतिर् ममै ऽषः ॥९॥
आज्ञानेया बलिनः साधुदान्ता महाबलाः शूरम् उदावहन्ति ।
एतस्य कर्माण्य् अतिमानुषाणि भीमे ऽति शब्दो ऽस्य गतः
पृथिव्याम् ॥ १० ॥
ना ऽस्या ऽपराधाः शेषम् अवाप्नुवन्ति ना ऽयं वैरं विस्मरते
कदाचित् ।
वैरस्या ऽन्तं संविधायो ऽपयाति पश्चाच् छान्तिं न च गच्छत्य्
अतीव ॥ ११ ॥
धनुर्धराग्र्यो धृतिमान् यशस्वी जितेन्द्रियो वृद्धसेवी नृवीरः ।
भ्राता च शिष्यश् च युधिष्ठिरस्य धनञ्जयो नाम पतिर्
ममै ऽषः ॥ १२ ॥
यो वै न कामान् न भयान् न लोभात् त्यजेद् धर्मं न नृशं-
स्यं च कुर्यात् ।
स एष वैश्वानरतुल्यतेजाः कुन्तीसुतः शत्रुसहः प्रमाथी ।
यः सर्वधर्मार्थविनिश्चयज्ञो भयार्त्तानाम् भयहर्ता मनीषी ॥१३॥
यस्यो ऽत्तमं रूपम् आहुः पृथिव्यां यम् पाण्डवाः परिरक्ष-
न्ति सर्वे ।
प्राणैर् गरीयांसम् अनुव्रतं वै स एष वीरो नकुलः प-
तिर् मे ॥ १४ ॥

यः खड्गयोधी लघुचित्रहस्तो महांश् च धीमान् सहदेव-
द्वितीयः ।
यस्याद्य कर्म द्रक्ष्यसे मूढसत्त्व शतक्रतोर् वा दैत्यसेनासु
सङ्ख्ये ॥ १५ ॥
शूरः कृतास्त्रो मतिमान् मनस्वी प्रियङ्करो धर्मसुतस्य राज्ञः ।
य एष चन्द्रार्कसमानतेजा जघन्यजः पाण्डवानाम् प्रियश् च ॥ १६ ॥
बुद्ध्या समो यस्य नरो न विद्यते वक्ता तथा सत्सु विनिश्च-
यज्ञः ।
स एष शूरो नित्यम् अमर्षणश् च धीमान् प्राज्ञः सहदेवः
पतिर् मे ॥ १७ ॥
त्यजेत् प्राणान् प्रविशेद् धव्यवाहं न त्व् एवैष व्याहरेद्
धर्मवाह्यम् ।
सदा मनस्वी क्षत्रधर्मे रतश् च कुन्त्याः प्राणैर् इष्टतमो
नृवीरः ॥ १८ ॥
विशीर्यन्तीं नावम् इवार्णवान्ते रत्नाभिपूर्णाम् मकरस्य पृष्ठे ।
सेनां तवेमां हतसर्वयोधां विक्षोभितां द्रक्ष्यसि पाण्डु-
पुत्रैः ॥ १९ ॥
इत्य् एते वै कथिताः पाण्डुपुत्रा यांस् त्वम् मोहाद् अव-
मन्य प्रवृत्तः ।

यद्य् एतेभ्यो मुच्यसे ऽरिष्टदेहः पुनर्जन्म प्राप्स्यसे जीव एव ॥२०॥

॥ वैशम्पायन उवाच ॥

ततः पार्थाः पञ्च पञ्चेन्द्रकल्पास् त्यक्त्वा त्रस्तान् प्राञ्जलींस् तान् पदातीन् ।
रथानीकं शरवर्षान्धकारं चक्रुः क्रुद्धाः सर्वतः संनिगृह्य ॥२१॥

॥ इति महाभारते द्रौपदीप्रमाथे सप्तमः सर्गः ॥७॥

॥ वैशम्पायन उवाच ॥

संतिष्ठत प्रहरत तूर्णं विपरिधावत ।
इति स्म सैन्धवो राजा चोदयामास तान् नृपान् ॥१॥
ततो घोरतरः शब्दो रणे समभवत् तदा ।
भीमार्जुनयमान् दृष्ट्वा सैन्यानां सयुधिष्ठिरान् ॥२॥
शिबिसौवीरसिन्धूनां विषादश् चा ऽप्य् अजायत ।
तान् दृष्ट्वा पुरुषव्याघ्रान् व्याघ्रान् इव बलोत्कटान् ॥३॥
हेमचित्रसमुत्सेधां सर्वशैक्यायसीं गदाम् ।
प्रगृह्या ऽभ्यद्रवद् भीमः सैन्धवं कालचोदितम् ॥४॥
तद् अन्तरम् अथावृत्य कोटिकाश्यो ऽभ्यहारयत् ।

महता रथवंशेन परिवार्य वृकोदरम् ॥ ५ ॥
शक्तितोमरनाराचैर् वीरबाहुप्रचोदितैः ।
कीर्यमाणो ऽपि बहुभिर् न स्म भीमो व्यकम्पत ॥ ६ ॥
गजं तु सगजारोहम् पदातींश् च चतुर्दश ।
जघान गदया भीमः सैन्धवध्वजिनीमुखे ॥ ७ ॥
पार्थः पञ्चशतान् शूरान् पार्वतीयान् महारथान् ।
परीप्समानः सौवीरं जघान ध्वजिनीमुखे ॥ ८ ॥
राजा स्वयं सुवीराणाम् प्रवराणाम् प्रहारिणाम् ।
निमेषमात्रेण शतं जघान समरे तदा ॥ ९ ॥
ददृशे नकुलस् तत्र रथात् प्रस्कन्द्य खड्गधृक् ।
शिरांसि पादरक्षाणां बीजवत् प्रवपन् मुहुः ॥ १० ॥
सहदेवस् तु सन्धाय रथेन गजयोधिनः ।
पातयामास नाराचैर् द्रुमेभ्य इव बर्हिणः ॥ ११ ॥
ततस् त्रिगर्तः सधनुर् अवतीर्य महारथात् ।
गदया चतुरो वाहान् राज्ञस् तस्य तदा ऽवधीत् ॥ १२ ॥
तम् अभ्यासगतं राजा पदातिं कुन्तीनन्दनः ।
अर्धचन्द्रेण बाणेन विव्याधो ऽरसि धर्मराट् ॥ १३ ॥
स भिन्नहृदयो वीरो वक्त्राच् छोणितम् उद्वमन् ।
पपाता ऽभिमुखः पार्थं छिन्नमूल इव द्रुमः ॥ १४ ॥

इन्द्रसेनद्वितीयस् तु रथात् प्रस्कन्द्य धर्मराट् ।
हताश्वः सहदेवस्य प्रतिपेदे महारथम् ॥ १५ ॥
नकुलं त्व् अभिसम्प्राप्य क्षेमङ्करमहामुखौ ।
उभाव् उभयतस् तीक्ष्णैः शरवर्षैर् अवर्षताम् ॥ १६ ॥
तोमरैर् अभिवर्षन्तौ जीमूताव् इव वार्षिकौ ।
एकैकेन विपाठेन जघ्ने माद्रवतीसुतः ॥ १७ ॥
त्रिगर्तराजः सुरथस् तस्या ऽथ रथधूर्गतः ।
रथम् आक्षेपयामास गजेन गजयानवित् ॥ १८ ॥
नकुलस् त्व् अपभीस् तस्माद् रथाच् चर्मासिपाणिमान् ।
उद्भ्राम्य स्थानम् आस्थाय तस्थौ गिरिर् इवा ऽचलः ॥ १९ ॥
सुरथस् तं गजवरं वधाय नकुलस्य तु ।
प्रेषयामास सक्रोधम् अभ्युच्छ्रितकरं ततः ॥ २० ॥
नकुलस् तस्य नागस्य समीपपरिवर्तिनः ।
सविषाणम् भुजम् मूले खड्गेन निरकृन्तत ॥ २१ ॥
स विनद्य महानादं गजः कङ्कनभूषणः ।
पतन् अवाक्शिरो भूमौ हस्त्यारोहान् अपोथयत् ॥ २२ ॥
स तत् कर्म महत् कृत्वा शूरो माद्रवतीसुतः ।
भीमसेनरथम् प्राप्य शर्म लेभे महारथः ॥ २३ ॥
भीमस् त्व् आपततो राज्ञः कोटिकाश्यस्य संयुगे ।

सूतस्य नुदतो वाहान् क्षुरेणा पाहरच् छिरः ॥२४॥
न बुबोध हतं सूतं स राजा बाहुशालिना ।
तस्या श्वा व्यद्रवन् सङ्ख्ये हतसूता हतस् ततः ॥२५॥
विमुखं हतसूतं तं भीमः प्रहरतां वरः ।
जघान तलयुक्तेन प्रासेना भ्येत्य पाण्डवः ॥२६॥
द्वादशानां तु सर्वेषां सौवीराणां धनञ्जयः ।
चकर्त निशितैर् भल्लैर् धनूंषि च शिरांसि च ॥२७॥
शिवीन् इक्ष्वाकुमुख्यांश् च त्रिगर्तान् सैन्धवान् अपि ।
जघाना तिरथः सङ्ख्ये बाणगोचरम् आगतान् ॥२८॥
सादिताः प्रत्यदृश्यन्त बहवः सव्यसाचिना ।
सपताकाश् च मातङ्गाः सध्वजाश् च महारथाः ॥२९॥
प्रच्छाद्य पृथिवीं तस्थुः सर्वम् आयोधनम् प्रति ।
शरीराण्य् अशिरस्कानि विदेहानि शिरांसि च ॥३०॥
श्वगृध्रकङ्ककाकोलश्येनगोमायुवायसाः ।
अतृप्यंस् तत्र वीराणां हतानाम् मांसशोणितैः ॥३१॥
हतेषु तेषु वीरेषु सिन्धुराजो जयद्रथः ।
विमुच्य कृष्णां संत्रस्तः पलायनमना भवत् ॥३२॥
स तस्मिन् सङ्कुले सैन्ये द्रौपदीम् अवतार्य ताम् ।
प्राणप्रेप्सुर् उपाधावद् वनं येन नराधिपः ॥३३॥

द्रौपदीं धर्मराजस् तु दृष्ट्वा धौम्यपुरस्कृताम् ।
माद्रीपुत्रेण वीरेण रथम् आरोपयत् तदा ॥ ३४ ॥
ततस् तद् विद्रुतं सैन्यम् अपयाते जयद्रथे ।
आदिश्या ''दिश्य नाराचैर् आजघान वृकोदरः ॥ ३५ ॥
सव्यसाची तु तं दृष्ट्वा पलायन्तं जयद्रथम् ।
वारयामास निघ्नन्तम् भीमं सैन्धवसैनिकान् ॥ ३६ ॥

॥ अर्जुन उवाच ॥

यस्या 'पराधात् प्राप्तो ऽयम् अस्मान् क्लेशो दुरासद् ।
तम् अस्मिन् समरोद्देशे न पश्यामि जयद्रथम् ॥ ३७ ॥
तम् एवा 'न्विष भद्रं ते किं ते योधैर् निपातितैः ।
अनामिषम् इदं कर्म कथं वा मन्यते भवान् ॥ ३८ ॥

॥ वैशम्पायन उवाच ॥

इत्य् उक्तो भीमसेनस् तु गुडाकेशेन धीमता ।
युधिष्ठिरम् अभिप्रेक्ष्य वाग्मी वचनम् अब्रवीत् ॥ ३९ ॥
हतप्रवीरा रिपवो भूयिष्ठं विद्रुता दिशः ।
गृहीत्वा द्रौपदीं राजन् निवर्ततु भवान् इतः ॥ ४० ॥
यमाभ्यां सह राजेन्द्र धौम्येन च महात्मना ।
प्राप्या ''श्रमपदं राजन् द्रौपदीं परिसान्त्वय ॥ ४१ ॥
न हि मे मोक्ष्यते जीवन् मूढः सैन्धवको नृपः ।

पातालतलसंस्थो ऽपि यदि शक्रो ऽस्य सारथिः ॥४२॥

॥ युधिष्ठिर उवाच ॥

न हन्तव्यो महाबाहो दुरात्मा ऽपि स सैन्धवः ।
दुःशलाम् अभिसंस्मृत्य गान्धारीं च यशस्विनीम् ॥४३॥

॥ वैशम्पायन उवाच ॥

तच् छ्रुत्वा द्रौपदी भीमम् उवाच व्याकुलेन्द्रिया ।
कुपिता ह्रीमती प्राज्ञा पती भीमार्जुनाव् उभौ ॥४४॥
कर्तव्यं चेत् प्रियम् मह्यम् वध्यः स पुरुषाधमः ।
सैन्धवापसदः पापो दुर्मतिः कुलपांसनः ॥४५॥
भार्याभिहर्ता वैरी यो यश् च राज्यहरो रिपुः ।
याचमानो ऽपि सङ्ग्रामे न मोक्तव्यः कथञ्चन ॥४६॥
इत्य् उक्तौ तौ नरव्याघ्रौ ययतुर् यत्र सैन्धवः ।
राजा निववृते कृष्णाम् आदाय सपुरोहितः ॥४७॥
स प्रविश्या ऽऽश्रमपदं व्यपविद्धबृसीघटम् ।
मार्कण्डेयादिभिर् विप्रैर् अनुकीर्णं ददर्श ह ॥४८॥
द्रौपदीम् अनुशोचद्भिर् ब्राह्मणैस् तैः समाहितैः ।
समियाय महाप्राज्ञः सभार्यो भ्रातृमध्यगः ॥४९॥
ते स्म तम् मुदिता दृष्ट्वा पुनः प्रत्यागतं नृपम् ।
जित्वा तान् सिन्धुसौवीरान् द्रौपदीं चा ऽऽहृताम् पुनः ॥५०॥

स तैः परिवृतो राजा तत्रै वो पविवेश ह ।
प्रविवेशा ऽश्रमं कृष्णा यमाभ्यां सह भाविनी ॥५१॥
भीमसेनार्जुनौ चा ऽपि श्रुत्वा क्रोशगतं रिपुम् ।
स्वयम् अश्वांस् तुदन्तौ तौ जवेने ऽवा ऽभ्यधावताम् ॥५२॥
इदम् अत्यद्भुतं चा ऽत्र चकार पुरुषो ऽर्जुनः ।
क्रोशमात्रगतान् अश्वान् सैन्धवस्य जघान यत् ॥५३॥
स हि दिव्यास्त्रसम्पन्नः कृच्छ्रकाले ऽप्य् असम्भ्रमः ।
अकरोद् दुष्करं कर्म शरैर् अस्त्राभिमन्त्रितैः ॥५४॥
ततो ऽभ्यधावतां वीराव् उभौ भीमधनञ्जयौ ।
हताश्वं सैन्धवम् भीतम् एकं व्याकुलचेतसम् ॥५५॥
सैन्धवस् तु हतान् दृष्ट्वा तथा ऽश्वान् स्वान् सुदुःखितः ।
अतिविक्रमकर्माणि कुर्वाणं च धनञ्जयम् ।
पलायनकृतोत्साहः प्राद्रवद् येन वै वनम् ॥५६॥
सैन्धवं त्व् अभिसम्प्रेक्ष्य पराक्रान्तम् पलायनम् ।
अनुयाय महाबाहुः फाल्गुनो वाक्यम् अब्रवीत् ॥५७॥
अनेन वीर्येण कथं स्त्रियम् प्रार्थयसे बलात् ।
राजपुत्र निवर्तस्व न ते युक्तम् पलायनम् ॥५८॥
कथं ह्य् अनुचरान् हित्वा शत्रुमध्ये पलायसे ।
इत्य् उच्यमानः पार्थेन सैन्धवो न न्यवर्तत ॥५९॥

तिष्ठ तिष्ठे ति तम् भीमः सहसा भ्यद्रवद् बली ।
मा वधीर् इति पार्थस् तं दयावान् प्रत्यभाषत ॥ ६० ॥
॥ इति महाभारते द्रौपदीप्रमाथे ऽष्टमः सर्गः ॥ ८ ॥

॥ वैशम्पायन उवाच ॥

जयद्रथस् तु सम्प्रेक्ष्य भ्रातराव् उद्यतायुधौ ।
प्राधावत् तूर्णम् अव्यग्रो जीवितेप्सुः सुदुःखितः ॥ १ ॥
तम् भीमसेनं धावन्तम् अवतीर्य रथाद् बली ।
अभिद्रुत्य निजग्राह केशपक्षे ह्य् अमर्षणः ॥ २ ॥
समुद्यम्य च तम् भीमो निष्पिपेष महीतले ।
शिरो गृहीत्वा राजानं ताडयामास चै व ह ॥ ३ ॥
पुनः सञ्जीवमानस्य तस्यो त्पतितुम् इच्छतः ।
पदा मूर्ध्नि महाबाहुः प्राहरद् विलपिष्यतः ॥ ४ ॥
तस्य जानु ददौ भीमो जघ्ने चै वम् अरत्निना ।
स मोहम् अगमद् राजा प्रहारवरपीडितः ॥ ५ ॥
विरोषम् भीमसेनं तु वारयामास फाल्गुनः ।
दुःशलायाः कृते राजा यत् तद् आहे ति कौरव ॥ ६ ॥

॥ भीम उवाच ॥

ना यम् पापसमाचारो मत्तो जीवितुम् अर्हति ।

कृष्णायास् तद् अनर्हायाः परिक्लेष्टा नराधमः ॥ ७ ॥
किं तु शक्यम् मया कर्तुं यद् राजा सततं घृणी ।
त्वं च बालिशया बुद्ध्या सदै ऽवा ऽस्मान् प्रबाधसे ॥ ८ ॥
एवम् उक्त्वा सटास् तस्य पञ्च चक्रे वृकोदरः ।
अर्द्धचन्द्रेण बाणेन किञ्चिद् अब्रुवतस् तदा ॥ ९ ॥
विकत्थयित्वा राजानं ततः प्राह वृकोदरः ।
जीवितुं चे ऽच्छसे मूढ हेतुम् मे गदतः शृणु ॥ १० ॥
दासो ऽस्मी ऽति त्वया वाच्यं संसत्सु च सभासु च ।
एवं ते जीवितं दद्यां एष युद्धजितो विधिः ॥ ११ ॥
एवं अस्त्व् इति स राजा कृष्यमाणो जयद्रथः ।
प्रोवाच पुरुषव्याघ्रम् भीमम् आहवशोभनम् ॥ १२ ॥
तत एनं विचेष्टन्तम् बद्ध्वा पार्थो वृकोदरः ।
रथं आरोपयामास विसञ्ज्ञम् पांसुगुण्ठितम् ॥ १३ ॥
ततस् तं रथं आस्थाय भीमः पार्थानुगस् तदा ।
अभ्येत्या ऽऽश्रममध्यस्थम् अभ्यगच्छद् युधिष्ठिरम् ॥ १४ ॥
दर्शयामास भीमस् तु तदवस्थं जयद्रथम् ।
तं राजा प्राहसद् दृष्ट्वा मुच्यताम् इति चा ऽब्रवीत् ॥ १५ ॥
राजानं चा ऽब्रवीद् भीमो द्रौपद्याः कथ्यताम् इति ।
दासभावं गतो ह्य् एष पाण्डूनाम् पापचेतनः ॥ १६ ॥

तम् उवाच ततो ज्येष्ठो भ्राता सप्रणयं वचः ।
मुञ्चेमम् अधमाचारम् प्रमाणा यदि ते वयम् ॥१७॥
द्रौपदी चाब्रवीद् भीमम् अभिप्रेक्ष्य युधिष्ठिरम् ।
दासो ऽयम् मुच्यतां राज्ञस् त्वया पञ्चसटः कृतः ॥१८॥
स मुक्तो ऽभ्येत्य राजानम् अभिवाद्य युधिष्ठिरम् ।
ववन्दे विह्वलो राजंस् तांश् च दृष्ट्वा मुनींस् तदा ॥१९॥
तम् उवाच घृणी राजा धर्मपुत्रो युधिष्ठिरः ।
तथा जयद्रथं दृष्ट्वा गृहीतं सव्यसाचिना ॥२०॥
अदास गच्छ मुक्तो ऽसि मैवं कार्षीः पुनः क्वचित् ।
स्त्रीकामं वा धिग् अस्तु त्वां क्षुद्र क्षुद्रसहायवान् ।
एवंविधं हि कः कुर्यात् त्वद् अन्यः पुरुषाधम ॥२१॥
गतसत्त्वम् इव ज्ञात्वा कर्तारम् अशुभस्य तम् ।
सम्प्रेक्ष्य भरतश्रेष्ठः कृपां चक्रे नराधिपः ॥२२॥
धर्मे ते वर्धताम् बुद्धिर् मा चाधर्मे मनः कृथाः ।
साश्वः सरथपादातिः स्वस्ति गच्छ जयद्रथ ॥२३॥
एवम् उक्तस् तु सव्रीडं तूष्णीं किंचिद् अवाङ्मुखः ।
जगाम राजन् दुःखार्तो गङ्गाद्वाराय भारत ॥२४॥



॥ अर्जुनसमागमः ॥

॥ वैशम्पायन उवाच ॥

ततः कदाचिद् धरिसम्प्रयुक्तम् महेन्द्रवाहं सहसो पयातम् ।
विद्युत्प्रभम् प्रेक्ष्य महारथानां हर्षोऽर्जुनं चिन्तयताम् बभूव ॥१॥
स दीप्यमानः सहसा ऽन्तरिक्षम् प्रकाशयन् मातलिसङ्गृहीतः।
बभौ महोल्के व घनान्तरस्था शिखे व चा ग्नेर् ज्वलिता विधूमा ॥२॥
तम् आस्थितः सन्ददृशे किरीटी स्रग्वी नवान्य् आभरणानि बिभ्रत् ।
धनञ्जयो वज्रधरः प्रभावः श्रिया ज्वलन् पर्वतम् आजगाम ॥३॥
स शैलम् आसाद्य किरीटमालिर् महेन्द्रवाहाद् अवरुह्य तस्मात् ।
धौम्यस्य पादाव् अभिवाद्य धीमान् अजातशत्रोस् तदनन्तरं च ॥४॥

वृकोदरस्या ऽपि ववन्द पादौ माद्रीसुताभ्याम् अभिवादितश् च।
समेत्य कृष्णाम् परिसान्त्व्य चे ऽमाम् प्रह्वो ऽभवद् भ्रातुर्
उपह्वरे सः ॥५॥

बभूव तेषाम् परमः प्रहर्षस् तेना ऽप्रमेयेन समागतानाम् ।
स चा ऽपि तान् प्रेक्ष्य किरीटमाली ननन्द राजानम् अभि-
प्रशंसन् ॥ ६ ॥

यम् आस्थितः सप्त जघान पूगान् दितेः सुतानां नमुचेः निहन्ता।
तम् इन्द्रवाहं समुपेत्य पार्थाः प्रदक्षिणं चक्रुर् अदीनसत्त्वाः ॥७॥
ते मातलेश् चक्रुर् अतीव हृष्टाः सत्कारम् अग्र्यं सुरराज-
तुल्यम् ।

सर्वान् यथावच् च दिवौकसस् च पप्रच्छुर् एनं कुरुराजपुत्राः॥८॥
तान् अप्य् असौ मातलिर् अभ्यनन्दत् पिते ऽव पुत्रान् अनु-
शिष्य चै ऽतान् ।

ययौ रथेना ऽप्रतिमप्रभेन पुनः सकाशं त्रिदशेश्वरस्य ॥ ९ ॥
गते तु तस्मिन् नरदेववर्यः शक्रात्मजः शक्ररिपुप्रमाथी ।
शक्रेण दत्तानि ददौ महात्मा महाधनान्य् उत्तमरूपवन्ति ।
दिवाकराभानि विभूषणानि प्रियः प्रियायै सुतसोममात्रे ॥१०॥
ततः स तेषां कुरुपुङ्गवानां शशाङ्कसूर्याग्निसमप्रभासाम् ।
विप्रर्षभानाम् उपविश्य मध्ये सर्वं यथावत् कथयाम्बभूव ॥११॥

एवम् मया ऽस्त्राण्य् उपशिक्षितानि शक्राच् च वाताच् च शि-
वाच् च साक्षात् ।
तथै ऽवं शीलेन समाधिना ऽथ प्रीताः सुराः मे सहिताः स-
हेन्द्राः ॥ १२ ॥
सङ्क्षेपतो वै स विशुद्धकर्मा तेभ्य। समाख्याय दिवि प्रवासम् ।
माद्रीसुताभ्यां सहितः किरीटी सुष्वाप ताम् आवसतिम् प्र-
तीतः ॥ १३ ॥

॥ इत्य् अर्जुनसमागमे प्रथमः सर्गः ॥ १ ॥

॥ वैशम्पायन उवाच ॥

ततो रजन्याम् व्युष्टायां धर्मराजं युधिष्ठिरम् ।
भ्रातृभिः सहितं सर्वैर् अवन्दत धनञ्जयः ॥ १ ॥
एतस्मिन्न् एव काले तु सर्ववादित्रनिस्वनः ।
बभूव तुमुलो भीमस् त्व् अन्तरिक्षे दिवौकसाम् ॥ २ ॥
रथनेमिस्वनश्चै ऽव घण्टाशब्दश् च भारत ।
पृथग् व्यालमृगानां च पक्षिणां चै ऽव सर्वशः ॥ ३ ॥
ते समन्ताद् अनुययुः गन्धर्वाप्सरसां गणाः ।
विमानैः सूर्यसङ्काशैः देवराजम् अरिन्दमम् ॥ ४ ॥

ततः स हरिभिर् युक्तं जाम्बूनदपरिष्कृतम् ।
मेघनादिनम् आरुह्य श्रिया परमया ज्वलन् ॥ ५ ॥
पार्थान् अभ्याजगामा ऽथ देवराजः पुरन्दरः ।
आगत्य च सहस्राक्षो रथाद् अवरुरोह वै ॥ ६ ॥
तं दृष्ट्वै ऽव महात्मानं धर्मराजो युधिष्ठिरः ।
भ्रातृभिः सहितः श्रीमान् देवराजम् उपागमत् ॥ ७ ॥
पूजयामास चै ऽवा ऽथ विधिवद् भूरिदक्षिणः ।
यथार्हम् अमितात्मानम् विधिदृष्टेन कर्मना ॥ ८ ॥
धनञ्जयम् च तेजस्वी प्रणिपत्य पुरन्दरम् ।
भृत्यवत् प्रणतस् तस्थौ देवराजसमीपतः ॥ ९ ॥
आघ्राय तम् महातेजाः कुन्तीपुत्रो युधिष्ठिरः ।
धनञ्जयम् अभिप्रेक्ष्य विनीतं स्थितम् अन्तिके ॥ १० ॥
जटिलं देवराजस्य तपोयुक्तम् अकल्मषम् ।
हर्षेण महता ऽविष्टः फाल्गुनस्या ऽथ दर्शनात् ।
बभूव परमप्रीतो देवराजं च पूजयन् ॥ ११ ॥
तं तथा दीनमनसं राजानं हर्षसम्प्लुतम् ।
उवाच वचनं धीमान् देवराजः पुरन्दरः ॥ १२ ॥
त्वम् इमाम् प्रिथिवीं राजन् प्रशासिष्यसि पाण्डव ।
स्वस्ति प्राप्नुहि कौन्तेय काम्यकम् पुनर् आश्रमम् ॥ १३ ॥

अस्त्राणि लब्धाणि च पाण्डवेन सर्वाणि मत्तः प्रयतेन राजन्।
कृतकृत्यस् चा स्मि धनञ्जयेन जेतुं न शक्यस् त्रिभिर् एष
लोकैः ॥१४॥
एवम् उक्ता सहस्राक्षः कुन्तीपुत्रं युधिष्ठिरम् ।
जगाम त्रिदिवं हृष्टः स्तूयमानो महर्षिभिः ॥१५॥
धनेश्वरगृहस्थानाम् पाण्डवानां समागमम् ।
शक्रेण य इमम् विद्वान् अधीयीत समाहितः ॥१६॥
सम्वत्सरम् ब्रह्मचारी नियतः शंसितव्रतः ।
स जीवेद् धि निराबाधः सुसुखी शरदां शतम् ॥१७॥
॥ इत्य् अर्जुनसमागमे द्वितीयः सर्गः ॥ २ ॥

॥ वैशम्पायन उवाच ॥
यथागतं गते शक्रे भ्रातृभिः सह सङ्गतः ।
कृष्णया चै व बिभत्सुर् धर्मराजम् अपूजयत् ॥१॥
अभिवादयमानं तम् मूर्द्धन्य् उपाघ्राय पाण्डवम् ।
हर्षगद्गदया वाचा प्रहृष्टो ऽर्जुनम् अब्रवीत् ॥२॥
कथम् अर्जुन कालो ऽयं स्वर्गे व्यतिगतस् तव ।
कथं चा स्त्राण्य् अवाप्तानि देवराजश् च तोषितः ॥३॥

सम्यग् वा ते गृहीतानि कच्चिद् अस्त्राणि पाण्डव ।
कच्चित् सुराधिपः प्रीतो रुद्रो वा ऽस्त्राण्य् अदात् तव ॥४॥
यथा दृष्टश् च ते शक्रो भगवान् वा पिनाकधृक् ।
यथे वा ऽस्त्राण्य् अवाप्तानि यथे वा ऽराधितश् च ते ॥५॥
यथो ऽक्तवांस् त्वाम् भगवान् शतक्रतुर् अरिन्दम ।
कृतप्रियस् त्वया ऽस्मी ऽति तस्य ते किम् प्रियं कृतम् ॥६॥
एतद् इच्छाम्य् अहं श्रोतुं विस्तरेण महाद्युते ।
यथा तुष्टो महादेवो देवराजस् तथा ऽनघ ॥७॥
यच् चा ऽपि वज्रपाणेस् तु प्रियं कृतम् अरिन्दम ।
एतद् आख्याहि मे सर्वं अखिलेन धनञ्जय ॥८॥

॥ अर्जुन उवाच ॥

शृणु हन्त महाराज विधिना येन दृष्टवान् ।
शतक्रतुम् अहं देवम् भगवन्तम् च शङ्करम् ॥९॥
विद्याम् अधीत्य तां राजंस् त्वयो ऽक्ताम् अरिमर्दन ।
भवता च समादिष्टस् तपसे प्रस्थितो वनम् ॥१०॥
भृगुतुङ्गम् अथो गत्वा काम्यकाद् आस्थितस् तपः ।
एकरात्रोषितः कच्चिद् अपश्यम् ब्राह्मणम् पथि ॥११॥
स माम् अपृच्छत् कौन्तेय क्वा ऽसि गन्ता ब्रवीहि मे ।
तस्मा अवितथं सर्वम् अब्रुवं कुरुनन्दन ॥१२॥

स तथ्यम् मम तच् छ्रुत्वा ब्राह्मणो राजसत्तम ।
अपूजयत मां राजन् प्रीतिमांश् चा ऽभवन् मयि ॥ १३ ॥
ततो माम् अब्रवीत् प्रीतस् ततः कुरुकुलोद्वह ।
तपस्यन्न् अचिरेण त्वं द्रक्ष्यसे विबुधाधिपम् ॥ १४ ॥
ततो ऽहं वचनात् तस्य गिरिम् आरुह्य शैशिरम् ।
तपो ऽतप्यम् महाराज मासम् मूलफलाशनः ॥ १५ ॥
द्वितीयश् चा ऽपि मे मासो जलम् भक्षयतो गतः ।
निराहारस् तृतीयो ऽथ मासः पाण्डवनन्दन ॥ १६ ॥
ऊर्द्ध्वबाहुश् चतुर्थं तु मासम् अस्मि स्थितः सदा ।
न च मे हीयते प्राणास् तद् अद्भुतम् इवा ऽभवत् ॥ १७ ॥
पञ्चमे त्व् अथ सम्प्राप्ते प्रथमे दिवसे गते ।
वराहसंस्थितं भूतं मत्समीपम् उपागमत् ॥ १८ ॥
निघ्नन् प्रोथेन पृथिवीं विलिखंश् चरणैर् अपि ।
सम्मार्जन् जठरेणोर्वीं विवर्तंश् च मुहुर्मुहुः ॥ १९ ॥
अनु तस्या ऽपरम् भूतम् महत् कैरातसंस्थितम् ।
धनुर्बाणासिमत् प्राप्तं स्त्रीगणानुगतं तदा ॥ २० ॥
ततो ऽहं धनुर् आदाय तथा ऽक्षय्यौ महेषुधी ।
अताडयं शरेणा ऽथ तद् भूतं लोमहर्षणम् ॥ २१ ॥
युगपत् तं किरातश् च विकृष्य बलवद् धनुः ।

अभ्यन्नग्नि दृढतरं कम्पयन् इव मे मनः ॥ २२ ॥
स तु माम् अब्रवीद् राजन् मम पूर्वम् परिग्रहः ।
मृगयाधर्मम् उत्सृज्य किमर्थं ताडितस् त्वया ॥ २३ ॥
एष ते निशितैर् बाणैर् दर्पं हन्मि स्थिरो भव ।
स धनुष्मान् महाकायस् ततो माम् अभ्यधावत ॥ २४ ॥
ततो गिरिम् इवा ऽत्यर्थम् अवृणोन् माम् महाशरैः ।
तं चा ऽहं शरवर्षेण महता समवाकिरम् ॥ २५ ॥
ततः शरैर् दीप्तमुखैः पत्रितैर् अनुमन्त्रितैः ।
प्रत्यविध्यम् अहं तं तु वज्रैर् इव शिलोच्चयम् ॥ २६ ॥
तस्य तच् छतधा रूपम् अभवच् च सहस्रधा ।
तानि चा ऽस्य शरीराणि शरैर् अहम् अताडयम् ॥ २७ ॥
पुनस् तानि शरीराणि एकीभूतानि भारत ।
अदृश्यन्त महाराज तान्य् अहं न्यधमम् पुनः ॥ २८ ॥
अणुर् बृहच्छिरा भूत्वा बृहांश् चा ऽणुशिराः पुनः ।
एकीभूतस् तथा ऽनेकः सो ऽभ्यवर्तत मां युधि ॥ २९ ॥
यदा ऽभिभवितुं बाणैर् न च शक्नोमि तं रणे ।
ततो महास्त्रम् आतिष्ठम् वायव्यम् भरतर्षभ ॥ ३० ॥
न चै ऽनम् अशकं हन्तुं तद् अद्भुतम् इवा ऽभवत् ।
अस्मिन् प्रतिहते चा ऽस्त्रे विस्मयो मे महान् अभूत् ॥ ३१ ॥

भूय एव महाराज अविशेषम् अहं ततः ।
अस्त्रपूगेन महता रणे भूतम् अवाकिरम् ॥३२॥
स्थूणाकर्णम् अथो जालं शरवर्षम् अथो ऽल्वणम् ।
शलभास्त्रम् अश्मवर्षं समास्थाया ऽहम् अभ्ययाम् ॥३३॥
जग्राह प्रसभं तानि सर्वाण्य् अस्त्राणि मे नृप ।
तेषु सर्वेषु ग्रस्तेषु ब्रह्मास्त्रम् अहम् आदिशम् ॥३४॥
ततः प्रज्वलितैर् बाणैर् सर्वतः सो ऽपचीयत ।
उपचीयमानो मया महास्त्रेण व्यवर्द्धत ॥३५॥
ततः संतापिता लोका मत्प्रसूतेन तेजसा ।
क्षणेन हि दिशः खं च सर्वतो हि विदीपितम् ॥३६॥
तद् अप्य् अस्त्रम् महातेजाः क्षणेने ऽव व्यघातयत् ।
ब्रह्मास्त्रे तु हते राजन् भयम् माम् महद् आविशत् ॥३७॥
ततो ऽहं धनुर् आदाय तथा ऽक्षय्यौ महेषुधी ।
सहसा ऽभ्यहनम् भूतं तान्य् अप्य् अस्त्राण्य् अभक्षयत् ॥३८॥
हतेष्व् अस्त्रेषु सर्वेषु भक्षितेष्व् आयुधेषु च ।
मम तस्य च भूतस्य बाहुयुद्धम् अवर्तत ॥३९॥
व्यायामम् मुष्टिभिः कृत्वा तलैर् अपि समाहतैः ।
अपारयंश् च तद् भूतं निश्चेष्टम् अगमम् महीम् ॥४०॥
ततः प्रहस्य तद् भूतं तत्रै ऽवा ऽन्तरधीयत ।

सह स्त्रीभिर् महाराज पश्यतो मे ऽद्भुतोपमम् ॥ ४१ ॥
एवं कृत्वा स भगवांस् ततो ऽन्यद् रूपम् आस्थितः ।
दिव्यम् एव महाराज वसानो ऽद्भुतमं वरम् ॥ ४२ ॥
हित्वा किरातरूपं च भगवांस् त्रिदशेश्वरः ।
स्वरूपं दिव्यम् आस्थाय तस्थौ तत्र महेश्वरः ॥ ४३ ॥
अदृश्यत ततः साक्षाद् भगवान् गोवृषध्वजः ।
उमासहायो व्यालधृग् बहुरूपः पिनाकधृक् ॥ ४४ ॥
स माम् अभ्येत्य समरे तथै वा ऽभिमुखं स्थितम् ।
शूलपाणिर् अथो ऽवाच तुष्टो ऽस्मी ऽति परंतप ॥ ४५ ॥
ततस् तद् धनुर् आदाय तूणौ चा ऽक्षय्यसायकौ ।
प्रादान् ममै ऽव भगवान् वरयस्वे ऽति चा ऽब्रवीत् ॥ ४६ ॥
तुष्टो ऽस्मि तव कौन्तेय ब्रूहि किं करवाणि ते ।
यत् ते मनोगतं वीर तद् ब्रूहि वितराम्य् अहम् ।
अमरत्वम् अपहाय ब्रूहि यत् ते मनोगतम् ॥ ४७ ॥
ततः प्राञ्जलिर् एवा ऽहम् अस्त्रेषु गतमानसः ।
प्रणम्य शिरसा शर्वं ततो वचनम् आददे ॥ ४८ ॥
भगवान् मे प्रसन्नश् चेद् ईप्सितो ऽयं वरो मम ।
अस्त्राणी ऽच्छाम्य् अहं ज्ञातुं यानि देवेषु कानिचित् ॥ ४९ ॥
ददानी ऽत्य् एव भगवान् अब्रवीत् त्र्यम्बकश् च माम् ।

रौद्रम् अस्त्रम् मदीयं त्वाम् उपस्थास्यति पाण्डव ॥५०॥
प्रददौ च मम प्रीतः सो ऽस्त्रम् पाशुपतम् महत् ।
उवाच च महादेवो दत्वा मे ऽस्त्रं सनातनम् ॥५१॥
न प्रयोज्यम् भवेद् एतन् मानुषेषु कथञ्चन ।
जगद् विनिर्दहेद् एवम् अल्पतेजसि पातितम् ॥५२॥
पीड्यमानेन बलवत् प्रयोज्यं स्याद् धनञ्जय ।
अस्त्राणाम् प्रतिघाते च सर्वथै व प्रयोजयेत् ॥५३॥
तद् अप्रतिहतं दिव्यं सर्वास्त्रप्रतिषेधनम् ।
मूर्तिमन् मे स्थितम् पार्श्वे प्रसन्ने गोवृषध्वजे ॥५४॥
उत्सादनम् अमित्राणाम् परसेनानिकृन्तनम् ।
दुरासदं दुष्प्रसाहं सुरदानवराक्षसैः ॥५५॥
अनुज्ञातस् त्व् अहं तेन तत्रै व समुपाविशम् ।
प्रेक्षतस् चै व मे देवस् तत्रै वा न्तरधीयत ॥५६॥
॥ इत्य् अर्जुनसमागमे तृतीयः सर्गः ॥ ३ ॥

॥ अर्जुन उवाच ॥
ततस् ताम् अवसम् प्रीतो रजनीं तत्र भारत ।
प्रसादाद् देवदेवस्य त्र्यम्बकस्य महात्मनः ॥१॥

व्युषितो रजनीं चा ऽहं कृत्वा पौर्वाह्णिकीं क्रियाम् ।
अपश्यं तं द्विजश्रेष्ठं दृष्टवान् अस्मि यम् पुरा ॥ २ ॥
तस्मै चा ऽहं यथावृत्तं सर्वम् एवं न्यवेदयम् ।
भगवन्तम् महादेवं समेतो ऽस्मी ऽति भारत ॥ ३ ॥
स माम् उवाच राजेन्द्र प्रियमाणो द्विजोत्तमः ।
दृष्टस् त्वया महादेवो यथा ना ऽन्येन केनचित् ॥ ४ ॥
समेत्य लोकपालैस् त्वं सर्वैर् वैवस्वतादिभिः ।
द्रष्टास्य् अनघ देवेन्द्रं स च ते ऽस्त्राणि दास्यति ॥ ५ ॥
एवम् उक्त्वा स मां राजन् आश्लिष्य च पुनः पुनः ।
अगच्छत् स यथाकामम् ब्राह्मणः सूर्यसन्निभः ॥ ६ ॥
अथ पराह्णे तस्या ऽह्नः प्रावात् पुण्यः समीरणः
पुनर् नवम् इमं लोकं कुर्वन् इव सपत्नहन् ॥ ७ ॥
दिव्यानि चै ऽव माल्यानि सुगन्धीनि नवानि च ।
शैशिरस्य गिरेः पादे प्रादुरासन् समीपतः ॥ ८ ॥
वादित्राणि च दिव्यानि सुघोषाणि समन्ततः ।
स्तुतयश् चे ऽन्द्रसंयुक्ता अश्रूयन्त मनोहराः ॥ ९ ॥
गणाश् चा ऽप्सरसां तत्र गन्धर्वाणां तथै ऽव च ।
पुरस्ताद् देवदेवस्य जगुर् गीतानि सर्वशः ॥ १० ॥
मरुतां च गणास् तत्र देवयानैर् उपागमत् ।

महेन्द्रानुचरा ये च देवसद्मनिवासिनः ॥ ११ ॥
ततो मरुत्वान् हरिभिर् दिव्यैर् वाहैः स्वलङ्कृतैः ।
शचीसहायस् तत्रा ऽऽयात् सह सर्वैस् तदा ऽमरैः ॥ १२ ॥
एतस्मिन्न् एव काले तु कुवेरो नरवाहनः ।
दर्शयामास मां राजन् लक्ष्म्या परमया युतः ॥ १३ ॥
दक्षिणस्यां दिशि यमम् प्रत्यपश्यं व्यवस्थितम् ।
वरुणं देवराजं च यथास्थानम् अवस्थितम् ॥ १४ ॥
ते माम् ऊचुर् महाराज सान्त्वयित्वा नरर्षभ ।
सव्यसाचिन् निरीक्षा ऽस्माँल् लोकपालान् अवस्थितान् ॥ १५ ॥
सुरकार्यार्थसिद्ध्यर्थं दृष्टवान् असि शङ्करम् ।
अस्मत्तो ऽपि गृहाण त्वम् अस्त्राणी ऽति समन्ततः ॥ १६ ॥
ततो ऽहम् प्रयतो भूत्वा प्रणिपत्य सुरर्षभान् ।
प्रत्यगृह्णां तदस्त्राणि महान्ति विधिवत् प्रभो ॥ १७ ॥
गृहीतास्त्रस् ततो देवैर् अनुज्ञातश् च भारत ।
अथ देवा ययुः सर्वे यथागतम् अरिन्दम ॥ १८ ॥
मघवान् अपि देवेशो रथम् आरुह्य सुप्रभम् ।
उवाच भगवान् स्वर्गं गन्तव्यम् फाल्गुन त्वया ॥ १९ ॥
पुरै ऽवा ऽऽगमनाद् अस्माद् वेद्य ऽहं त्वां धनञ्जय ।
अतः परं त्व् अहं वै त्वां दर्शये भरतर्षभ ॥ २० ॥

त्वया हि तीर्थेषु पुरा समाप्लावः कृतो ऽसकृत् ।
तपश् चे दम् महत् तप्तं स्वर्गं गन्तासि पाण्डव ॥२१॥
भूयश् चै व तु तप्तव्यं तपश्चरणम् उत्तमम् ।
स्वर्गं त्व् अवश्यं गन्तव्यं त्वया शत्रुनिषूदन ॥२२॥
मातलिर् मन्नियोगात् त्वां त्रिदिवम् प्रापयिष्यति ।
विदितस् त्वं हि देवानाम् मुनीनां च महात्मनाम् ॥२३॥
ततो ऽहम् अब्रुवं शक्रं प्रसीद भगवन् मम ।
आचार्यं वरये यत् त्वाम् अस्त्रार्थे त्रिदशेश्वर ॥२४॥

॥ इन्द्र उवाच ॥

क्रूरकर्मा स्त्रवित् ततः भविष्यसि परन्तप ।
मदर्थम् अस्त्राणी प्सुस् त्वं तं कामम् पाण्डवा प्नुहि ॥२५॥

॥ अर्जुन उवाच ॥

ततो ऽहम् अब्रुवं ना हं दिव्यान्य् अस्त्राणि शत्रुहन् ।
मानुषेषु प्रयोक्ष्यामि विना स्त्रप्रतिघातनात् ॥२६॥
तानि दिव्यानि मे ऽस्त्राणि प्रयच्छ विबुधाधिप ।
लोकांश् चा स्त्रजितान् पश्चाल् लभेयं सुरपुङ्गव ॥२७॥

॥ इन्द्र उवाच ॥

परीक्षार्थम् मये तत् ते वाक्यम् उक्तं धनञ्जय ।
ममा त्मजस्य वचनं सूपपन्नम् इदं तव ॥२८॥

शिक्ष मे भवनं गत्वा सर्वाण्य् अस्त्राणि भारत ।
वायोर् अग्नेर् वसुभ्यो ऽपि वरुणात् समरुद्गणात् ॥ २९ ॥
साध्यम् पैतामहं चै ऽव गन्धर्वोरगरक्षसाम् ।
वैष्णवानि च सर्वाणि नैर्ऋतानि तथै ऽव च ॥ ३० ॥
मद्गतानि च यानीह सर्वास्त्राणि कुरूद्वह ।
एवम् उक्त्वा तु मां शक्रस् तत्रै ऽवा ऽन्तरधीयत ॥ ३१ ॥
अथा ऽपश्यं हरियुजं रथम् ऐन्द्रम् उपस्थितम् ।
दिव्यम् मायामयम् पुण्यं यतम् मातलिना नृप ॥ ३२ ॥
लोकपालेषु यातेषु माम् उवाचा ऽथ मातलिः ।
द्रष्टुम् इच्छति शक्रस् त्वां देवराजो महाद्युते ॥ ३३ ॥
संसिध्यस्व महाबाहो कुरु कार्यम् अनुत्तमम् ।
पश्य पुण्यकृतां लोकान् सशरीरो दिवं व्रज ॥ ३४ ॥
देवराजः सहस्राक्षस् त्वां दिदृक्षति भारत ॥ ३५ ॥
इत्य् उक्तो ऽहम् मातलिना गिरिम् आमन्त्र्य शैशिरम् ।
प्रदक्षिणम् उपावृत्य समारोहं रथोत्तमम् ॥ ३६ ॥
चोदयामास स हयान् मनोमारुतरंहसः ।
मातलिर् हयतत्त्वज्ञो यथावद् भूरिदक्षिणः ॥ ३७ ॥
अवैक्षत च मे वक्त्रं स्थितस्या ऽथ स सारथिः ।
तथा भ्रान्ते रथे राजन् विस्मितश् चे ऽदम् अब्रवीत् ॥ ३८ ॥

अत्यद्भुतम् इदं त्व् अद्य विचित्रम् प्रतिभाति मे ।
यद् आस्थितो रथं दिव्यम् पदान् न चलितः पदम् ॥३९॥
देवराजो ऽपि हि मया नित्यम् अत्रो पलक्षितः ।
विचलन् प्रथमोत्पाते हयानाम् भरतर्षभ ॥४०॥
त्वम् पुनः स्थित एवा त्र रथे भ्रान्ते कुरूद्वह ।
अतिशक्रम् इदं सर्वं तवे ति प्रतिभाति मे ॥४१॥
इत्य् उक्त्वा ऽऽकाशम् आविश्य मातलिर् विबुधालयम् ।
दर्शयामास मे राजन् विमानानि च भारत ॥४२॥
स रथो हरिभिर् युक्त ऊर्द्ध्वम् आचक्रमे ततः ।
ऋषयो देवताश् चै व पूजयन्ति नरोत्तम ॥४३॥
ततः कामगमाँल् लोकान् अपश्यं वै सुरर्षिणाम् ।
गन्धर्वाप्सरसां चै व प्रभावम् अमितौजसाम् ॥४४॥
नन्दनादीनि देवानाम् वनान्य् उपवनानि च ।
दर्शयामास मे शीघ्रम् मातलिः शक्रसारथिः ॥४५॥
तत्र शक्रस्य भवनम् अपश्यम् अमरावतीम् ।
दिव्यैः कामफलैर् वृक्षैः रत्नैश् च समलङ्कृतम् ॥४६॥
न तत्र सूर्यस् तपति न शीतोष्णे न च क्लमः ।
न बाधते तत्र रजस् तत्रा स्ति न जरा नृप ॥४७॥
न तत्र शोको दैन्यं वा दौर्बल्यं चो पलक्ष्यते ।

दिवौकसाम् महाराज न ग्लानिर् अरिमर्दन ॥४८॥
न क्रोधलोभौ तत्रा ऽस्तां सुरादीनां विशाम् पते ।
नित्यं तुष्टाश् च ते राजन् प्राणिनः सुरवेश्मनि ॥४९॥
नित्यपुष्पफलास् तत्र पादपा हरितच्छदाः ।
पुष्करिण्यश् च विविधाः पद्मसौगन्धिकायुताः ॥५०॥
शीतं तत्र ववौ वायुः सुगन्धी जीवनः शुचिः ।
सर्वरत्नविचित्रा च भूमिः पुष्पविभूषिता ॥५१॥
मृगद्विजाश् च बहवो रुचिरा मधुरस्वराः ।
विमानगामिनश् चा ऽत्र दृश्यन्ते बहवो ऽमराः ॥५२॥
ततो ऽपश्यं वसून् रुद्रान् साध्यांश् च समरुद्गणान् ।
आदित्यान् अश्विनौ चै ऽव तान् सर्वान् प्रत्यपूजयम् ॥५३॥
ते माम् वीर्येण यशसा तेजसा च बलेन च ।
अस्त्रैश् चा ऽप्य् अन्वजानन्त सङ्ग्रामे विजयेन च ॥५४॥
प्रविश्य ताम् पुरीं दिव्यां देवगन्धर्वपूजिताम् ।
देवराजं सहस्राक्षम् उपातिष्ठं कृताञ्जलिः ॥५५॥
ददाव् अर्धासनम् प्रीतः शक्रो मे ददतां वरः ।
बहुमानाच् च गात्राणि पस्पर्श मम वासवः ॥५६॥
तत्रा ऽहं देवगन्धर्वैः सहितो भूरिदक्षिणैः ।
अस्त्रार्थम् अवसं स्वर्गे शिक्षाणो ऽस्त्राणि भारत ॥५७॥

विश्वावसोश् च वै पुत्रश् चित्रसेनो ऽभवत् सखा ।
स च गान्धर्वम् अखिलं ग्राहयामास मां नृप ॥ ५८ ॥
ततो ऽहम् अवसं तत्र गृहीतास्त्रः प्रपूजितः ।
सुखं शक्रस्य भवने सर्वकामसमन्वितः ॥ ५९ ॥
शृण्वन् वै गीतशब्दं च तूर्यशब्दं च पुष्कलम् ।
पश्यंश् चाप्सरसां श्रेष्ठा नृत्यन्तीर् भरतर्षभ ॥ ६० ॥
तत् सर्वम् अनवज्ञाय तथ्यम् विज्ञाय भारत ।
प्रत्यर्थम् परिगृह्याहम् अस्त्रेष्व् एव व्यवस्थितः ॥ ६१ ॥
ततो ऽतुष्यत् सहस्राक्षस् तेन कामेन मे विभुः ।
एवम् मे वसतो राजन् एष कालो ऽत्यगाद् दिवि ॥ ६२ ॥
॥ इत्य् अर्जुनसमागमे चतुर्थः सर्गः ॥ ४ ॥

॥ अर्जुन उवाच ॥

कृतास्त्रम् अतिविश्वस्तम् अथ मां हरिवाहनः ।
संस्पृशन् मूर्ध्नि पाणिभ्याम् इदं वचनम् अब्रवीत् ॥ १ ॥
न त्वम् अद्य युधा जेतुं शक्यः सुरगणैर् अपि ।
किम् पुनर् मानुषे लोके मानुषैर् अकृतात्मभिः ॥ २ ॥
अप्रमेयो ऽप्रधृष्यश् च युधेष्व् अप्रतिमस् तथा ।

अथा ऽब्रवीत् पुणर् देवः सम्प्रहृष्टतनूरुहः ॥ ३ ॥
अस्त्रयुद्धे समो वीर न ते कश्चिद् भविष्यति ।
अप्रमत्तः सदा दक्षः सत्यवादी जितेन्द्रियः ॥ ४ ॥
ब्रह्मण्यश् चा ऽस्त्रविच् चा ऽसि शूरश् चा ऽसि कुरूद्वह ।
अस्त्राणि समवाप्तानि त्वया दश च पञ्च च ॥ ५ ॥
पञ्चभिर् विधिभिः पार्थ न त्वया विद्यते समः ।
प्रयोगम् उपसंहारम् आवृत्तिं च धनञ्जय ॥ ६ ॥
प्रायश्चित्तं च वेत्थ त्वम् प्रतिघातं च सर्वशः ।
ततो गुर्वर्थकालो ऽयं समुत्पन्नः परन्तप ॥ ७ ॥
प्रतिजानीष्व तं कर्तुं ततो वक्ष्याम्य् अहम् परम् ।
ततो ऽहम् अब्रुवं राजन् देवराजम् इदं वचः ॥ ८ ॥
विषह्यं यन् मया कर्तुं कृतम् एव निबोध तत् ।
ततो माम् अब्रवीद् राजन् प्रहसन् बलवृत्रहा ॥ ९ ॥
ना ऽविषह्यं तवा ऽद्या ऽस्ति त्रिषु लोकेषु किञ्चन ।
निवातकवचा नाम दानवा मम शत्रवः ॥ १० ॥
समुद्रकुक्षिम् आश्रित्य दुर्गे प्रतिवसन्त्य् उत ।
तिस्रः कोट्यः समाख्यातास् तुल्यरूपबलप्रभाः ॥ ११ ॥
तांस् तत्र जहि कौन्तेय गुर्वर्थस् ते भविष्यति ।
ततो मातलिसंयुक्तम् मयूरसमरोमभिः ॥ १२ ॥

हयैर् उपेतम् प्रादान् मे रथं दिव्यम् महाप्रभम् ।
बबन्ध चै व मे मूर्द्धि किरीतम् इदम् उत्तमम् ॥ १३ ॥
स्वरूपसदृशं चै व प्रादाद् अङ्गविभूषणम् ।
अभेद्यं कवचं चे दं स्पर्शरूपवद् उत्तमम् ॥ १४ ॥
अजरां ज्याम् इमां चा पि गाण्डीवे समयोजयत् ।
ततः प्रायाम् अहं तेन स्यन्दनेन विराजता ॥ १५ ॥
येना जयद् देवपतिर् बलिम् वैरोचनिम् पुरा ।
ततो देवाः सर्व एव तेन घोषेण बोधिताः ॥ १६ ॥
मन्वाना देवराजम् मां समाजग्मुर् विशाम् पते ।
दृष्ट्वा च माम् अपृच्छन्त किं करिष्यसि फाल्गुन ॥ १७ ॥
तान् अब्रुवं यथाभूतम् इदं कर्तास्मि संयुगे ।
निवातकवचानां तु प्रस्थितम् माम् वधैषिणम् ॥ १८ ॥
निबोधत महाभागाः शिवम् आशास्त मे ऽनघाः ।
तुष्टुवुर् माम् प्रसन्नास् ते यथा देवम् पुरन्दरम् ॥ १९ ॥
रथेना नेन मघवान् जितवान् शम्बरं युधि ।
नमुचिं बलवृत्रौ च प्रह्लादनरकाव् अपि ॥ २० ॥
बहूनि च सहस्राणि प्रयुतान्य् अर्बुदान्य् अपि ।
रथेना नेन दैत्यानां जितवान् मघवा युधि ॥ २१ ॥
त्वम् अप्य् अनेन कौन्तेय निवातकवचान् रणे ।

विजेता युधि विक्रम्य पुरे व मघवा युधि ॥ २२ ॥
अयं च शङ्खप्रवरो येन जेतासि दानवान् ।
अनेन विजिता लोकाः शक्रेण ऽपि महात्मना ॥ २३ ॥
प्रदीयमानं देवैस् तं देवदत्तं जलोद्भवम् ।
प्रत्यगृह्णं जयाय ऽहं स्तूयमानस् तदा ऽमरैः ॥ २४ ॥
सशङ्खः कवची बाणी प्रगृहीतशरासनः ।
दानवालयम् अत्युग्रम् प्रयातो ऽस्मि युयुत्सया ॥ २५ ॥
॥ इत्य् अर्जुनसमागमे पञ्चमः सर्गः ॥ ५ ॥

॥ अर्जुन उवाच ॥

ततो ऽहं स्तूयमानस् तु तत्र तत्र महर्षिभिः ।
अपश्यम् उदधिं दिव्यम् अपाम् पतिम् अथा ऽव्ययम् ॥ १ ॥
फेनवत्यः प्रकीर्णाश् च संहताश् च समुत्थिताः ।
ऊर्मयश् चा ऽत्र दृश्यन्ते चलन्त इव पर्वताः ॥ २ ॥
नावः सहस्रशस् तत्र रत्नपूर्णाः समन्ततः ।
तिमिङ्गिलाः कच्छपाश् च तथा तिमितिमिङ्गिलाः ॥ ३ ॥
मकराश् चा ऽत्र दृश्यन्ते जले मग्ना इवा ऽद्रयः
सङ्खानां च सहस्राणि मग्नान्य् अप्सु समन्ततः ॥ ४ ॥

दृश्यन्ते स्म यथा रात्रौ तारास् तन्वभ्रसंवृताः ।
तथा सहस्रशस् तत्र रत्नसङ्घाः प्लवन्त्य् उत ॥ ५ ॥
वायुश् च घूर्णति भीमस् तद् अद्भुतम् इवाभवत् ।
तम् उदीक्ष्य महावेगं सर्वाम्भोनिधिम् उत्तमम् ॥ ६ ॥
अपश्यं दानवाकीर्णं तद् दैत्यपुरम् अन्तिकात् ।
तत्र वै मातलिस् तूर्णं निपत्य पृथिवीतले ॥ ७ ॥
रथं तं तु समाश्लिष्य प्राद्रवद् रथयोगवित् ।
नादयन् रथघोषेण तत् पुरं समुपाद्रवत् ॥ ८ ॥
रथघोषं तु तं श्रुत्वा स्तनयित्नोर् इवाम्बरे ।
मन्वाना देवराजम् माम् आविग्ना दानवाभवन् ॥ ९ ॥
सर्वे सम्भ्रान्तमनसः शरचापधराः स्थिताः ।
तथा सिशूलपरशुगदापरिघपाणयः ॥ १० ॥
ततो द्वाराणि पिदधुर् दानवास् त्रस्तचेतसः ।
संविधाय पुरे रक्षां न स्म कश्चन दृश्यते ॥ ११ ॥
ततः शङ्खम् उपादाय देवदत्तम् महास्वनम् ।
पुरम् आसुरम् आश्लिष्य प्राधमं तं शनैर् अहम् ॥ १२ ॥
स तु शब्दो दिवं स्तब्ध्वा प्रतिशब्दम् अजीजनत् ।
वित्रेसुश् च विलिल्युश् च भूतानि सुमहान्त्य् अपि ॥ १३ ॥
ततो निवातकवचाः सर्व एव स्वलङ्कृताः ।

दंशिता विविधैस् त्राणैः विचित्रायुधपाणयः ॥ १४ ॥
आयसैश् च महाशूलैर् गदाभिर् मुशलैर् अपि ।
पट्टिशैः करवालैश् च रथचक्रैश् च भारत ॥ १५ ॥
शतघ्नीभिर् भुशुण्डिभिः खड्गैश् चित्रैः स्वलङ्कृतैः ।
प्रगृहीतैर् दितेः पुत्राः प्रादुरासन् सहस्रशः ॥ १६ ॥
ततो विचार्य बहुशो रथमार्गेषु तान् हयान् ।
अनोदयत् समे देशे मातलिर् भरतर्षभ ॥ १७ ॥
तेन तेषाम् प्रणुन्नानाम् आशुवाच् छीघ्रगामिनाम् ।
ना ऽन्वपश्यं तदा किञ्चित् तन् मे ऽद्भुतम् इवा ऽभवत् ॥ १८ ॥
ततस् ते दानवास् तत्र वादित्राणि सहस्रशः ।
विकृतस्वररूपाणि भृशं सर्वाण्य् अवादयन् ॥ १९ ॥
तेन शब्देन सहसा समुद्रे पर्वतोपमाः ।
आप्लवन्त गतैः सत्त्वैः मत्स्याः शतसहस्रशः ॥ २० ॥
ततो वेगेन महता दानवा माम् उपाद्रवन् ।
विमुञ्चन्तः शितान् बाणान् शतशो ऽथ सहस्रशः ॥ २१ ॥
स सम्प्रहारस् तुमुलस् तेषाम् मम च भारत ।
आवर्तत महाघोरो निवातकवचान्तकः ॥ २२ ॥
ततो देवर्षयश् चै ऽव दानवर्षिगणाश् च ये ।
ब्रह्मर्षयश् च सिद्धाश् च समाजग्मुर् महामृधे ॥ २३ ॥

ते वै माम् अनुरूपाभिर् मधुराभिर् जयैषिणः ।
अस्तुवन् मुनयो वाग्भिर् यथे न्द्रं तारकामये ॥२४॥
॥ इत्य् अर्जुनसमागमे षष्ठः सर्गः ॥ ६ ॥

॥ अर्जुन उवाच ॥

ततो निवातकवचाः सर्वे वेगेन भारत ।
अभ्यद्रवन् मां सहिताः प्रगृहीतायुधा रणे ॥१॥
आछिद्य रथपन्थानम् उत्क्रोशन्तो महारथाः ।
आवृत्य सर्वतस् ते मां शरवर्षैर् अवाकिरन् ॥२॥
ततो ऽपरे महावीर्याः शूलपट्टिशपाणयः ।
शूलानि च भुशुण्डीश् च मुमुचुर् दानवा मयि ॥३॥
तच् छूलवर्षं सुमहद् गदाशक्तिसमाकुलम् ।
अनिशं सृज्यमानं तैर् अपतद् मद्रथोपरि ॥४॥
अन्ये माम् अभ्यधावन्त निवातकवचा युधि ।
शितशस्त्रायुधा रौद्राः कालरूपाः प्रहारिणः ॥५॥
तान् अहं विविधैर् बाणैर् वेगवद्भिर् अजिह्मगैः
गाण्डीवमुक्तैर् अभ्यघ्नम् एकैकं दशभिर् मृधे ॥६॥
ते कृता विमुखाः सर्वे मत्प्रयुक्तैः शिलाशितैः ।

ततो मातलिना तूर्णं हयास् ते सम्प्रचोदिताः ॥७॥
मार्गान् बहुविधांस् तत्र विचेरुर् वातरंहसः ।
सुसंयता मातलिना प्रामथ्नन्त दितेः सुतान् ॥८॥
शतं शतास् ते हरयस् तस्मिन् युक्ता महारथे ।
तदा मातलिना यता व्यचरन् उल्मका इव ॥९॥
तेषां च रथपातेन रथनेमिस्वनेन च ।
मम बाणनिपातैश् च हतास् ते शतशो ऽसुराः ॥१०॥
गतासवस् तथै वा न्ये प्रगृहीतशरासनाः ।
हतसारथयस् तत्र व्यकृष्यन्त तुरङ्गमैः ॥११॥
ते दिशो विदिशः सर्वे प्रतिरुद्धप्रहारिणः ।
अभ्यघ्नन् विविधैः शस्त्रैः ततो मे व्यथितम् मनः ॥१२॥
ततो ऽहम् मातलेर् वीर्यम् अपश्यम् परमाद्भुतम् ।
अश्वांस् तथा वेगवतो यद् अयत्नाद् अधारयत् ॥१३॥
ततो ऽहं लघुभिश् चित्रैर् अस्त्रैस् तान् असुरान् रणे ।
चिच्छेद सायुधान् राजन् शतशो ऽथ सहस्रशः ॥१४॥
एवम् मे चरतस् तत्र सर्वयत्नेन शत्रुहन् ।
प्रीतिमान् अभवद् वीरो मातलिः शक्रसारथिः ॥१५॥
वध्यमानास् ततस् ते तु हयैस् तेन रथेन च ।
अगमन् प्रक्षयं केचिन् न्यवर्तन्त तथा परे ॥१६॥

स्पर्द्धमाना इवा स्माभिर् निवातकवचा रणे ।
शरवर्षैः शरार्त्ता माम् महद्भिः प्रत्यवारयन् ॥१७॥
ततो ऽहं लघुभिश् चित्रैर् ब्रह्मास्त्रपरिमन्त्रितैः ।
व्यधमं शायकैर् आशु शतशो ऽथ सहस्रशः ॥१८॥
ततः सम्पीड्यमानास् ते क्रोधाविष्टा महासुराः ।
अपीडयन् मां सहिताः शरशूलासिवृष्टिभिः ॥१९॥
ततो ऽहम् अस्त्रम् आतिष्ठम् परमं तिग्मतेजसम् ।
दयितं देवराजस्य गान्धर्वं नाम भारत ॥२०॥
ततः खड्गान् त्रिशूलांश् च तोमरांश् च सहस्रशः ।
अस्त्रवीर्येण शतधा तैर् मुक्तान् अहम् अच्छिदम् ॥२१॥
छित्त्वा प्रहरणान्य् एषां ततस् तान् अपि सर्वशः ।
प्रत्यविध्यम् अहं रोषाद् दशभिर् दशभिः शरैः ॥२२॥
गाण्डीवाद् धि ततः सङ्ख्ये यथा भ्रमरपङ्क्तयः ।
निष्पतन्ति महाबाणास् तन् मातलिर् अपूजयत् ॥२३॥
तेषाम् अपि च बाणास् ते बहुत्वाच् छलभा इव ।
अवाकिरन् माम् बलवत् तान् अहम् व्यधमं शरैः ॥२४॥
वध्यमानास् ततस् ते तु निवातकवचाः पुनः ।
शरवर्षैर् महद्भिर् मां समन्तात् पर्यवारयन् ॥२५॥
शरवेगान् निहत्या ऽहम् अस्त्रैर् अस्त्रनिघातिभिः ।

ज्वलद्भिः परमैः शीघ्रैस् तान् अविध्यं सहस्रशः ॥२६॥
तेषां छिन्नानि गात्राणि विसृजन्ति स्म शोनितम् ।
प्रावृषी वा भिवृष्टानि शृङ्गान्य् अथ धराभृताम् ॥२७॥
इन्द्राशनिसमस्पर्शैर् वेगवद्भिर् अजिह्मगैः ।
मद्वाणैर् वाध्यमानास् ते समुद्विग्नाः स्म दानवाः ॥२८॥
शतधा भिन्नदेहास् च क्षीणप्रहरणौजसः ।
ततो निवातकवचा माम् अयुध्यन्त मायया ॥२९॥
॥ इत्य् अर्जुनसमागमे सप्तमः सर्गः ॥७॥

॥ अर्जुन उवाच ॥

ततो ऽश्मवर्षं सुमहत् प्रादुरासीत् समन्ततः ।
नगमात्रैः शीलखण्डैस् तन् मां दृढम् अपीडयत् ॥१॥
तद् अहम् वज्रसङ्काशैर् महेन्द्रास्त्रप्रचोदितैः ।
अचूर्णयम् वेगवद्भिः शरवर्षैर् महाहवे ॥२॥
चूर्ण्यमाने ऽश्मवर्षे तु पावकः समजायत ।
तत्रा श्मचूर्णा न्यपतन् पावकप्रकरा इव ॥३॥
ततो ऽश्मवर्षे विहते जलवर्षम् महत्तरम् ।
धाराभिर् अक्षमात्राभिर् प्रादुरासीन् ममा न्तिके ॥४॥

14*

नभसः प्रच्युता धारास् तिग्मवेगाः सहस्रशः ।
अवृण्वन् सर्वतो व्योम दिशश् चो 'पदिशस् तथा ॥५॥
धाराणां च निपातेन वायोर् विस्फूर्जितेन च ।
गर्जितेन च दैत्यानां न प्राज्ञायत किञ्चन ॥६॥
धारा दिवि च सम्बद्धा वसुधायां च सर्वशः ।
व्यमोहयन्त मां तत्र निपतन्त्यो ऽनिशम् भुवि ॥७॥
तत्रो 'पदिष्टम् इन्द्रेण दिव्यम् अस्त्रं विशोषणम् ।
दिव्यम् प्राहिणवं घोरम् अशुष्यत् तेन वै जलम् ॥८॥
हते ऽश्मवर्षे तु मया जलवर्षे च शोषिते ।
मुमुचुर् दानवा मायाम् अग्निं वायुं च भारत ॥९॥
ततो ऽहम् अग्निं व्यधमं सलिलास्त्रेण सर्वशः ।
शैलेन च महास्त्रेण वायोर् वेगम् अवारयम् ॥१०॥
तस्याम् प्रतिहतायां तु दानवा युद्धदुर्मदाः ।
प्राकुर्वन् विविधाम् मायां यौगपद्येन भारत ॥११॥
ततो वर्षम् प्रादुरभूत् सुमहल् लोमहर्षणम् ।
अस्त्राणां घोररूपाणाम् अग्नेर् वायोस् तथा ऽश्मनाम् ॥१२॥
सा तु मायामयी वृष्टिः पीडयामास मां युधि ।
अथ घोरं तमस् तीव्रम् प्रादुरासीत् समन्ततः ॥१३॥
तमसा संवृते लोके घोरेण परुषेण च ।

हयो विमुखाश् चा ऽसन् प्रास्खलच् चा ऽपि मातलिः ॥१४॥
हस्ताद् धिरण्मयश् चा ऽस्य प्रतोदः प्रापतद् भुवि ।
असकृच् चा ऽह माम् भीतः क्वा ऽसी ऽति भरतर्षभ ॥१५॥
मां च भीर् अविशत् तीव्रा तस्मिन् विगततेजसि ।
स च माम् विगतज्ञानः सन्त्रस्तम् इदम् अब्रवीत् ॥१६॥
सुराणाम् असुराणां च सङ्ग्रामः सुमहान् अभूत् ।
अमृतार्थम् पुरा तात स वै दृष्टो मया ऽनघ ॥१७॥
शम्बरस्य वधे चा ऽपि सङ्ग्रामः सुमहान् अभूत् ।
सारथ्यं देवराजस्य तत्रा ऽपि कृतवान् अहम् ॥१८॥
तथै ऽव वृत्रस्य वधे सङ्गृहीता हया मया ।
वैरोचनिर् मया युद्धं दृष्टं चा ऽपि सुदारुणम् ॥१९॥
बलप्रह्लादयोश् चा ऽपि तथा ऽन्येषां च पाण्डव ।
जम्भस्य सुमहाघोरः सङ्ग्रामो लोमहर्षणः ॥२०॥
एते मया महाघोराः सङ्ग्रामाः पर्युपासिताः ।
न चा ऽपि विगतज्ञानो भूतपूर्वो ऽस्मि पाण्डव ॥२१॥
पितामहेन सङ्ग्रामः प्रजानां विहितो ध्रुवम् ।
न हि युद्धम् इदं युक्तम् अन्यत्र जगतः क्षयात् ॥२२॥
तस्य तद् वचनं श्रुत्वा संस्थभ्या ऽत्मानम् आत्मना ।
मोहयिष्यन् दानवानाम् अहम् मायाबलम् महत् ॥२३॥

अब्रुवम् मातलिम् भीतम् पश्य मे भुजयोर् बलम् ।
अस्त्राणां च प्रभावं वै धनुषो गाण्डीवस्य च ॥२४॥
अद्या ऽस्त्रमायये ऽतेषाम् मायाम् एतां सुदारुणाम् ।
विनिहन्मि तमस् चो ऽग्रम् मा भैः सूत स्थिरो भव ॥२५॥
एवम् उक्त्वा ऽहम् असृजम् अस्त्रमायां नराधिप ।
मोहनीं सर्वभूतानां हिताय त्रिदिवौकसाम् ॥२६॥
पीड्यमानासु मायासु मया तास्व् असुरोत्तमाः ।
पुनर् बहुविधा मायाः प्राकुर्वन्न् अमितौजसः ॥२७॥
पुनः प्रकाशम् अभवत् तमसा ग्रस्यते पुनः ।
भवत्य् अदर्शनो लोकः पुनर् अप्सु निमज्जति ॥२८॥
सुसङ्गृहीतैर् हरिभिः प्रकाशे सति मातलिः ।
व्यचरत् स्यन्दनाग्रेण सङ्ग्रामे लोमहर्षणे ॥२९॥
ततः पर्यपतन्न् उग्रा निवातकवचा मयि ।
तान् अहम् विचरन् दृष्ट्वा प्राहिणवं यमसादनम् ॥३०॥
वर्तमाने तथा युद्धे निवातकवचान्तिके ।
ना ऽपश्यं सहसा सर्वान् दानवान् मायया वृतान् ॥३१॥
॥ इत्य् अर्जुनसमागमे ऽष्टमः सर्गः ॥८॥



॥ अर्जुन उवाच ॥

अदृश्यमानास् ते दैत्याः योधयन्ति स्म मायया ।
अदृश्येना ऽस्त्रवीर्येण तान् अप्य् अहम् अयोधयम् ॥ १ ॥
गाण्डीवमुक्ता विशिखाः सम्यग् अस्त्रप्रचोदिताः ।
अच्छिन्दन् उत्तमाङ्गानि यत्र यत्र स्म ते ऽभवन् ॥ २ ॥
ततो निवातकवचा मध्यमाना मया युधि ।
संहृत्य मायां सहसा प्राविशन् पुरम् आत्मनः ॥ ३ ॥
व्यपयातेषु दैत्येषु प्रादुर्भूते च दर्शने ।
अपश्यं दानवांस् तत्र हतान् शतसहस्रशः ॥ ४ ॥
विनिष्पिष्टानि तत्रै ऽषां शस्त्राण्य् आभरणानि च ।
कूटशस् तत्रा ऽदृश्यन्त गात्राणि कवचानि च ॥ ५ ॥
हयानां ना ऽन्तरं ह्य् आसीत् पदाद् विचलितुम् पदम् ।
उत्पत्य सहसा तस्थुर् अन्तरिक्षगतास् ततः ॥ ६ ॥
ततो निवातकवचा व्योमसञ्छाद्य केवलम् ।
अदृश्या ह्य् अभ्यवर्तन्त विसृजन्तः शिलोच्चयान् ॥ ७ ॥
अन्तर्भूमिगतास् चा ऽन्ये हयानां चरणान्य् अथ ।
व्यगृह्णन् दानवा घोरा रथचक्रे च भारत ॥ ८ ॥
विनिगृह्य हयांस् चा ऽथ रथं च मम युध्यतः ।
सर्वतो माम् अचिन्वन्त सरथं धरणीधरैः ॥ ९ ॥

पर्वतैर् उपचीयद्भिः पतमानैस् तथा परैः ।
स देशो यत्र वर्तामो गुहेव समपद्यत ॥ १० ॥
पर्वतैश् छाद्यमानो ऽहं निगृहीतैश् च वाजिभिः ।
अगच्छम् परमाम् आर्त्तिम् मातलिस् तद् अलक्षयत् ॥ ११ ॥
लक्षयित्वा च माम् भीतम् इदं वचनम् अब्रवीत् ।
अर्जुनार्जुन मा भैस् त्वं वज्रम् अस्त्रम् उदीरय ॥ १२ ॥
ततो ऽहं तस्य तद् वाक्यं श्रुत्वा वज्रम् उदीरयम् ।
देवराजस्य दयितम् भीमम् अस्त्रं नराधिप ॥ १३ ॥
अचलं स्थानम् आसाद्य गाण्डीवम् अनुमन्त्र्य च ।
अमुञ्चम् वज्रसंस्पर्शान् आयसान् निशितान् शरान् ॥ १४ ॥
ततो मायाश् च ताः सर्वाः निवातकवचांश् च तान् ।
ते वज्रचोदिता बाणा वज्रभूताः समाविशन् ॥ १५ ॥
ते वज्रवेगनिहता दानवाः पर्वतोपमाः ।
इतरेतरम् आश्लिष्य न्यपतन् पृथिवीतले ॥ १६ ॥
अन्तर्भूमौ च ये ऽगृह्णन् दानवा रथवाजिनः ।
अनुप्रविश्य तान् बाणाः प्राहिण्वन् यमसादनम् ॥ १७ ॥
हतैर् निवातकवचैर् निरस्तैः पर्वतोपमैः ।
समाच्छाद्यत देशः स विकीर्णैर् इव पर्वतैः ॥ १८ ॥
न हयानां गतिः काचिन् न रथस्य न मातलेः ।

मम वा दृश्यत तत्र तद् अद्भुतम् इवा भवत् ॥१९॥
ततो माम् प्रहसन् राजन् मातलिः प्रत्यभाषत ।
नै तद् अर्जुन देवेशे त्वयि वीर्यं यद् दृश्यते ॥२०॥
हतेषु असुरसङ्घेषु दारास् तेषां च सर्वशः ।
प्राक्रोशन् नगरे तस्मिन् यथा शरदि लक्ष्मणाः ॥२१॥
ततो मातलिना सार्द्धम् अहं तत्पुरम् अभ्ययाम् ।
त्रासयन् रथघोषेण निवातकवचस्त्रियः ॥२२॥
तान् दृष्ट्वा दशसाहस्रान् मयूरसदृशान् हयान् ।
रथं च रविसङ्काशम् प्राद्रवन् गणशः स्त्रियः ॥२३॥
ताभिर् आभरणैः शब्दस् त्रासिताभिः समीरितः ।
शिलानाम् इव शैलेषु पतन्तीनाम् अभूत् तदा ॥२४॥
वित्रस्ता दैत्यनार्यस् ताः स्वानि वेश्मान्य् अथा विशन् ।
बहुरत्नविचित्राणि शातकुम्भमयानि च ॥२५॥
तद् अद्भुताकारम् अहं दृष्ट्वा नगरम् उत्तमम् ।
विशिष्टं देवनगराद् अपृच्छम् मातलिं ततः ॥२६॥
इदम् एवंविधं कस्माद् देवा ना "वासयन्त्य् उत ।
पुरन्दरपुराद् धी दं विशिष्टम् इति लक्षये ॥२७॥

॥ मातलिर् उवाच ॥

आसीद् इदम् पुरा पार्थ देवराजस्य नः पुरम् ।

15

ततो निवातकवचैर् इतः प्रच्याविताः सुराः ॥ २८ ॥
तपस् तप्त्वा महत् तीव्रम् प्रसाद्य च पितामहम् ।
इदं वृतं निवासाय देवेभ्यश् चा भयं युधि ॥ २९ ॥
ततः शक्रेण भगवान् स्वयम्भूर् इति चोदितः ।
विधत्स्व भगवन् अन्तम् आत्मनो हितकाम्यया ॥ ३० ॥
तत उक्तो भगवता दिष्टम् अत्रे ति वासवः ।
भविता ऽन्तस् त्वम् एवै षां देहेना ऽन्येन शत्रुहन् ॥ ३१ ॥
तत एषां वधार्थाय शक्रो ऽस्त्राणि ददौ तव ।
न हि शक्याः सुरैर् हन्तुं य एते निहतास् त्वया ॥ ३२ ॥
कालस्य परिणामेन ततस् त्वम् इह भारत ।
एषाम् अन्तकरः प्राप्तः तत् त्वया च कृतं तथा ॥ ३३ ॥
दानवानां विनाशाय अस्त्राणाम् परमम् बलम् ।
ग्राहितस् त्वम् महेन्द्रेण पुरुषेन्द्र तद् उत्तमम् ॥ ३४ ॥

॥ अर्जुन उवाच ॥

ततः प्रशाम्य नगरं दानवांश् च निहत्य तान् ।
पुनर् मातलिना सार्द्धम् अगच्छं देवसद्म तत् ॥ ३५ ॥

॥ इत्य् अर्जुनसमागमे नवमः सर्गः ॥ ९ ॥



॥ अर्जुन उवाच ॥

निवर्तमानेन मया महद् दृष्टं ततो ऽपरम् ।
पुरं कामचरं दिव्यम् पावकार्कसमप्रभम् ॥ १ ॥
रत्नद्रुममयैश् चित्रम् भास्वरैश् च पतत्रिभिः ।
पौलोमैः कालखञ्जैश् च नित्यहृष्टैर् अधिष्ठितम् ॥ २ ॥
गोपुराट्टालकोपेतं चतुर्द्वारं दुरासदम् ।
सर्वरत्नमयं दिव्यम् अद्भुतोपमदर्शनम् ॥ ३ ॥
द्रुमैः पुष्पफलोपेतैः दिव्यरत्नमयैर् वृतम् ।
तथा पतत्रिभिर् दिव्यैर् उपेतं सुमनोहरैः ॥ ४ ॥
असुरैर् नित्यमुदितैः शूलर्ष्टिमुशलायुधैः ।
चापमुद्गरहस्तैश् च स्रग्विभिः सर्वतो वृतम् ॥ ५ ॥
तद् अहम् प्रेक्ष्य दैत्यानाम् पुनर् अद्भुतदर्शनम् ।
अपृच्छम् मातलिं राजन् किम् इदम् वर्तते ऽद्भुतम् ॥ ६ ॥

॥ मातलिर् उवाच ॥

पुलोमा नाम दैतेयी कालका च महासुरी ।
दिव्यं वर्षसहस्रं ते चेरतुः परमं तपः ॥ ७ ॥
तपसो ऽन्ते ततस् ताभ्यां स्वयम्भूर् अददाद् वरम् ।
अगृह्णीताम् वरं ते तु सुतानाम् अल्पदुःखताम् ॥ ८ ॥
अवध्यतां च राजेन्द्र सुरराक्षसपन्नगैः ।

पुरं सुरमणीयं च खेचरं सुमहाप्रभम् ॥ ९ ॥
सर्वरत्नैः समुदितं दुर्धर्षम् अमरैर् अपि ।
महर्षियक्षगन्धर्वपन्नगासुरराक्षसैः ॥ १० ॥
सर्वकामगुणोपेतं वीतशोकम् अनामयम् ।
ब्रह्मणा भरतश्रेष्ठ कालकेयकृते कृतम् ॥ ११ ॥
तद् इदं तु पुरं दिव्यं चरत्य् अमरवर्जितम् ।
पौलोमाध्युषितं वीर कालकञ्जैश् च दानवैः ॥ १२ ॥
हिरण्यपुरम् इत्य् एवं ख्यायते नगरम् महत् ।
रक्षितं कालकेयैश् च पौलोमैश् च महासुरैः ॥ १३ ॥
त एते मुदिता राजन् न वध्याः सर्वदैवतैः ।
निवसन्त्य् अत्र राजेन्द्र गतोद्वेगा निरुत्सुकाः ॥ १४ ॥
मानुषो मृत्युर् एतेषां निर्दिष्टो ब्रह्मणा पुरा ।
एतान् अपि रणे पार्थ कालकाञ्जान् दुरासदान् ।
वज्रास्त्रेण नयस्वा ऽशु विनाशं सुमहाबलान् ॥ १५ ॥
॥ अर्जुन उवाच ॥
सुरासुरैर् अवध्यांस् तान् अहं ज्ञात्वा विशाम् पते ।
अब्रुवम् मातलिं हृष्टो याह्य् एतत् पुरम् अञ्जसा ॥ १६ ॥
त्रिदशेशद्विषो यावत् क्षयम् अस्त्रैर् नयाम्य् अहम् ।
न कथञ्चिद् धि मे पापा न वध्या ये सुरद्विषः ॥ १७ ॥

उवाह मां ततः शीघ्रं हिरण्यपुरम् अन्तिकात् ।
रथेन तेन दिव्येन हरियुक्तेन मातलिः ॥ १८ ॥
ते माम् आलक्ष्य दैतेया विचित्राभरणाम्बराः ।
समुत्पेतुर् महावेगा रथान् आस्थाय दंशिताः ॥ १९ ॥
ततो नालीकनाराचैर् भल्लैः शक्त्यृष्टितोमरैः ।
प्रत्यघ्नन् दानवेन्द्रा मां क्रुद्धास् तीव्रपराक्रमाः ॥ २० ॥
तद् अहं शरवर्षेण महता प्रत्यवारयम् ।
शरवर्षम् महद् राजन् विद्याबलम् उपाश्रितः ॥ २१ ॥
व्यमोहयं च तान् सर्वान् रथमार्गैश् चरन् रणे ।
ते ऽन्योन्यम् अभिसम्मूढाः पातयन्ति स्म दानवाः ॥ २२ ॥
तेषाम् एवम् विमूढानाम् अन्योन्यम् अभिधावताम् ।
शिरांसि विशिखैर् दीप्तैर् व्यहनं शतसङ्घशः ॥ २३ ॥
ते वध्यमाना दैतेयाः पुरम् आस्थाय तत् पुनः ।
खम् उत्पेतुः सनगरा मायाम् आस्थाय दानवीम् ॥ २४ ॥
ततो ऽहं शरवर्षेण महता कुरुनन्दन ।
मार्गम् आवृत्य दैत्यानां गतिम् एषाम् अवारयम् ॥ २५ ॥
तत् पुरं खचरं दिव्यं कामगं सूर्यसप्रभम् ।
दैतेयैर् वरदानेन धार्यते स्म यथासुखम् ॥ २६ ॥
अन्तर्भूमौ निपतति पुनर् ऊर्ध्वम् प्रतिष्ठते ।

पुनस् तिर्यक् प्रयात्य् आशु पुनर् अप्सु निमज्जति ॥२७॥
अमरावतीं सङ्काशं तत् पुरं कामगम् महत् ।
अहम् अस्त्रैर् बहुविधैः प्रत्यगृह्णम् परन्तप ॥२८॥
ततो ऽहं शरजालेन दिव्यास्त्रमुदितेन ह ।
व्यगृह्णं सह दैतेयैस् तत् पुरम् भरतर्षभ ॥२९॥
विक्षतं चा "यसैर् बाणैर् मत्प्रयुक्तैर् अजिह्मगैः ।
महीम् अभ्यपतद् राजन् प्रभग्नं पुरम् आसुरम् ॥३०॥
ते वध्यमाना मद्बाणैर् वज्रवेगैर् अयस्मयैः ।
पर्यभ्रमन्त वै राजन् असुराः कालचोदिताः ॥३१॥
ततो मातलिर् अप्य् आशु पुरस्तान् निपतन् इव ।
महीम् अवातरत् क्षिप्रं रथेना "दित्यवर्चसा ॥३२॥
ततो रथसहस्राणि षष्टिस् तेषाम् अमर्षिणाम् ।
युयुत्सूनाम् मया सार्द्धम् पर्यवर्तन्त भारत ॥३३॥
तान् अहं निशितैर् बाणैर् व्यधमं गार्द्धवाजितैः ।
ते युद्धे सन्न्यवर्तन्त समुद्रस्य यथो "र्मयः ॥३४॥
ने "मे शक्या मानुषेण युद्धेने "ति प्रचिन्त्य तत् ।
ततो ऽहम् आनुपूर्व्येण दिव्यान्य् अस्त्राण्य् अयोजयम् ॥३५॥
ततस् तानि सहस्राणि रथानां चित्रयोधिनाम् ।
अस्त्राणि मम दिव्यानि प्रत्यघ्नन् शनकैर् इव ॥३६॥

रथमार्गान् विचित्रांस् ते विचरन्तो महाबलाः ।
प्रत्यदृश्यन्त सङ्ग्रामे शतशो ऽथ सहस्रशः ॥ ३७ ॥
विचित्रमुकुटापीडा विचित्रकवचध्वजाः ।
विचित्राभरणाश् चै वं नन्दयन्ती व मे मनः ॥ ३८ ॥
अहं तु शरवर्षैस् तान् अस्त्रप्रमुदिते रणे ।
ना शक्नुवम् पीडयितुं ते तु माम् पर्यपीडयन् ॥ ३९ ॥
तैः पीड्यमानो बहुभिः कृतास्त्रैः कुशलैर् युधि ।
व्यथितो ऽस्मि महायुद्धे भयं चा गान् महन् मम ॥ ४० ॥
ततो ऽहं देवदेवाय रुद्राय प्रयतो रणे ।
स्वस्ति भूतेभ्य इत्य् उक्का महास्त्रं समचोदयम् ॥ ४१ ॥
यत् तद् रौद्रम् इति ख्यातं सर्वामित्रविनाशनम् ।
ततो ऽपश्यं त्रिशिरसम् पुरुषं नवलोचनम् ॥ ४२ ॥
त्रिमुखं षड्भुजं दीप्तम् अर्कज्वलनमूर्द्धजम् ।
लेलिहानैर् महानागैः कृतापीडम् अमित्रहन् ॥ ४३ ॥
विभीस् ततस् तद् अस्त्रं तु घोरं रौद्रं सनातनम् ।
दृष्ट्वा गाण्डीवसंयोगम् आनीय भरतर्षभ ॥ ४४ ॥
नमस्कृत्य त्रिनेत्राय शर्वाया मिततेजसे ।
मुक्तवान् दानवेन्द्राणाम् पराभावाय भारत ॥ ४५ ॥
मुक्तमात्रे ततस् तस्मिन् रूपाण्य् आसन् सहस्रशः ।

मृगाणाम् अथ सिंहानाम् व्याघ्राणां च विशाम् पते ॥४६॥
ऋक्षाणाम् महिषाणां च पन्नगानां तथा गवाम् ।
शरभानां गजानां च वानराणां च सङ्घशः ॥४७॥
ऋषभाणां वराहाणाम् मार्जाराणां तथै 'व च ।
शालवृकाणाम् प्रेतानाम् भुरुण्डानां च सर्वशः ॥४८॥
गृध्राणां गरुडानां च भ्रमराणां तथै 'व च ।
वृक्षाणाम् पर्वतानां च समुद्राणां तथै 'व च ।
देवानां च ऋषीणां च गन्धर्वाणां च सर्वशः ॥४९॥
पिशाचानां च यक्षाणां तथै 'व च सुरद्विषाम् ।
गुह्यकानां च सङ्ग्रामे नैर्ऋतानां तथै 'व च ॥५०॥
रूपाणां गजवक्त्राणाम् उलूकानां तथै 'व च ।
मीनवाजिसरूपाणां नानाशस्त्रासिपाणिनाम् ॥५१॥
तथै 'व यातुधानानां गदामुद्गरधारिणाम् ।
एतैश् चा 'न्यैश् च बहुभिर् नानारूपधरैस् तथा ॥५२॥
सर्वम् आसीज् जगद् व्याप्तं तस्मिन् अस्त्रे विसर्जिते ।
त्रिशिरोभिश् चतुर्दंष्ट्रैश् चतुराष्ट्रैश् चतुर्भुजैः ॥५३॥
अनेकरूपसंयुक्तैर् मांसमेदोवसास्थिभिः ।
अभीक्ष्णम् वध्यमानास् ते दानवा नाशम् आगताः ॥५४॥
अर्कज्वलनतेजोभिर् वज्राशनिसमस्वनैः ।

अद्रिसारमयैश् चा ऽन्यैर् वाणैर् अरिनिवर्हणैः ॥५५॥
व्यहनं दानवान् सर्वान् मुहूर्तेने ऽव भारत ।
गाण्डीवास्त्रप्रणुन्नांस् तान् गतासून् नभसश् च्युतान् ॥५६॥
दृष्ट्वा ऽहम् प्राणमम् भूयस् त्रिपुरघ्नाय वेधसे ।
ततो रौद्रास्त्रनिष्पिष्टान् दिव्याभरणभूषितान् ॥५७॥
निशम्य परमं हर्षम् अगमद् देवसारथिः ।
तद् असह्यं कृतं कर्म देवैर् अपि दुरासदम् ॥५८॥
दृष्ट्वा माम् पूजयामास मातलिः शक्रसारथिः
उवाच चे ऽदं वचनम् प्रियमाणः कृताञ्जलिः ॥५९॥
सुरासुरैर् असह्यं हि कर्म यत् साधितं त्वया ।
न ह्य् एतत् संयुगे कर्तुम् अपि शक्तः सुरेश्वरः ॥६०॥
सुरासुरैर् अवध्यं हि पुरम् एतत् खगम् महत् ।
त्वया विमथितं वीर स्ववीर्यतपसो बलात् ॥६१॥
विध्वस्ते ऽथ पुरे तस्मिन् दानवेषु हतेषु च ।
विनदन्त्यः स्त्रियः सर्वा निष्पेतुर् नगराद् बहिः ॥६२॥
प्रकीर्णकेश्यो व्यथिताः कुरर्य इव दुःखिताः ।
पेतुः पुत्रान् पितॄन् भ्रातॄन् शोचमाना महीतले ॥६३॥
रुदन्त्यो दीनकम् व्यस्ता विनदन्त्यो हतेश्वराः ।
उरांसि परिणिघ्नन्त्यो विस्रस्तस्रग्विभूषणाः ॥६४॥

तच् छोकयुक्तम् अश्रीकं दुःखदैन्यसमाहतम् ।
न बभौ दानवपुरं हतविप्रं हतेश्वरम् ॥ ६५॥
गन्धर्वनगराकारं हतनागम् इव ह्रदम् ।
शुष्कवृक्षम् इवा ऽरण्यम् अदृश्यम् अभवत् पुरम् ॥ ६६॥
मां तु संहृष्टमनसं क्षिप्रम् मातलिर् आनयत् ।
देवराजस्य भवनं कृतकर्माणम् आहवात् ॥ ६७॥
हिरण्यपुरम् उत्सृज्य निहत्य च महासुरान् ।
निवातकवचांश् चै ऽव ततो ऽहं शक्रम् आगमम् ॥ ६८॥
मम कर्म च देवेन्द्रे मातलिर् विस्तरेण तत् ।
सर्वम् विश्रावयामास यथाभूतम् महाद्युते ॥ ६९॥
हिरण्यपुरघातं च मायानां च निवारणम् ।
निवातकवचानां च वधं सङ्ख्ये महौजसाम् ॥ ७०॥
तच् छ्रुत्वा भगवान् प्रीतः सहस्राक्षः पुरन्दरः ।
मरुद्भिः सहितः प्रीतः साधु साध्व् इत्य् अथा ऽब्रवीत् ॥ ७१॥
ततो मां देवराजो ऽसौ समाश्वास्य पुनः पुनः ।
अब्रवीद् विबुधैः सार्द्धम् इदं सुमधुरं वचः ॥ ७२॥
अतिदेवासुरं कर्म कृतम् एतत् त्वया रणे ।
गुर्वर्थश् च कृतः पार्थ महान् शत्रून् घ्नता मम ॥ ७३॥
एवम् एवं सदा भाव्यं स्थिरेणा ऽऽजौ धनञ्जय ।

असम्मूढेन चा ऽस्त्राणां कर्तव्यम् प्रतिपादनम् ॥ ७४ ॥
अविषह्यो रणे हि त्वं देवदानवराक्षसैः ।
सयक्षासुरगन्धर्वैः सपक्षिगणपन्नगैः ॥ ७५ ॥
वसुधां चा ऽपि कौन्तेय त्वद्बाहुबलनिर्जिताम् ।
पालयिष्यति धर्मात्मा कुन्तीपुत्रो युधिष्ठिरः ॥ ७६ ॥
॥ इत्य् अर्जुनसमागमे दशमः सर्गः ॥ १० ॥

॥ अर्जुन उवाच ॥

ततो माम् अतिविश्वस्तं संरूढं शरविक्षतम् ।
देवराजो ऽभिसृज्ये ऽदं काले वचनम् अब्रवीत् ॥ १ ॥
दिव्यान्य् अस्त्राणि सर्वाणि त्वयि तिष्ठन्ति भारत ।
न त्वा ऽभिभवितुं शक्तो मानुषो भुवि कश्चन ॥ २ ॥
भीष्मो द्रोणः कृपः कर्णः शकुनिः सह राजभिः
सङ्ग्रामस्थस्य ते पुत्र कलां ना ऽर्हन्ति षोडशीम् ॥ ३ ॥
इदं च मे तनुत्राणम् प्रायच्छन् मघवा प्रभुः ।
अभेद्यं काञ्चनं दिव्यं स्रजं चै ऽव हिरण्मयीम् ॥ ४ ॥
देवदत्तं च मे शङ्खम् पुनः प्रादान् महारवम् ।
दिव्यं चे ऽदं किरीटम् मे स्वयम् इन्द्रो युयोज ह ॥ ५ ॥

16*

ततो दिव्यानि वस्त्राणि दिव्याण्य् आभरणानि च ।
प्रादाच् छक्रो मने तानि रुचिराणि वृहन्ति च ॥ ६ ॥
एवं सम्पूजितस् तत्र सुखम् अस्म्य् उषितो नृप ।
इन्द्रस्य भवने पुण्ये गन्धर्वशिशुभिः सह ॥ ७ ॥
ततो माम् अब्रवीच् छक्रः प्रीतिमान् अमरैः सह ।
समयो ऽर्जुन गन्तुं ते भ्रातरो हि स्मरन्ति ते ॥ ८ ॥
एवम् इन्द्रस्य भवने पञ्च वर्षाणि भारत ।
उषितानि मया राजन् स्मरता द्यूतजं कलिम् ॥ ९ ॥
ततो भवन्तम् अद्राक्षम् भ्रातृभिः परिवारितम् ।
गन्धमादनपादस्य पर्वतस्या ऽस्य मूर्द्धनि ॥ १० ॥



Corrigenda.

Pag. 2. Sl. 9.b. pro वैश्वतो lege वैवस्वतो·
- 3. - 19.b. - त्वत्कृते ऽ यम् lege त्वत्कृते 'यम्·
- 5. - 41.b. - "म्भसा lege 'म्भसा·
- 8. Lin. 2. - मार्कन्देय lege मार्कण्डेय·
- 8. Sl. 6.b. - षष्टे पष्टे lege पष्ठे पष्ठे·
- 9. - 8.a. - 'न्वितः lege 'न्विता·
- 10. - 18.a. - कस्मिनश्चित् lege कस्मिंश्चित्·
- 11. - 25.a. - देवताम् lege देवतान्·
- 20. - 4.a. - नियमम् lege नियमं·
- 22. - 19.b. - हन्तुम् lege हातुम्·
- 26. - 13.b. - नेनुं lege नेतुं·
- 28. - 27.a. - ददाानि lege ददानि·
- 28. - 28.b. - स्पुरेश lege सुरेश·
- 29. - 32.b. - नृपात्मज lege नृपात्मजे·
- 32. - 44.b. - बलानाम् lege बलिनाम्·
- 35. - 67.b. - शर्वा lege सर्वा·
- 41. - 2.a. - सर्वां lege सर्वान्·
- 44. - 25.b. - १ lege २.
- 45. - 38.b. - दिशम lege दिशम्·
- 56. - 14. lege: पाद्यम् परिगृह्याणे 'दम् आसनं च नृपात्मज ।
मृगान् पञ्चशतं चै 'व प्रातराशं ददानि ते ॥ १४ ॥
- 58. - 1.a. pro स lege सा·
- 59. - 10.b. - एव मे तेन lege एवम् एतेन·
- 60. - 17.b. - शब्दा lege शरा·

Pag. 63. Sl. 9. *a.* pro नवम् lege वनम्.
- 65. - 15. *b.* - शिवाः lege शिताः
- 71. - 5. *a.* - अथावत्य lege अथा "वत्य.
- 73. - 17. *b.* - विपाटेन lege विपाठेन.
- 78. - 2. *a.* - अवर्तीय lege अवतीर्य.
- 79. - 11. *a.* - दासो 'स्मी lege दासो ऽस्मी.
- 80. - 24. *a.* - तुष्णीं lege तूष्णीं.
- 100. - 13. *b.* - किरीतम् lege किरीटम्.
- 101. - 2. *b.* - उर्मयश् lege ऊर्मयश्.
- 101. - 4. *b.* - सङ्खानां lege शङ्खानां.
- 101. - 22. *b.* - मघवा युधि lege मघवा वशी.
- 103. - 15. *a.* - आयशैश् lege आयसैश्.
- 107. - 1. *b.* - शीलाखण्डैस् lege शिलाखण्डैस्.
- 107. - 28. *b.* - वाध्यमानास् lege वध्यमानास्.
- 108. - 8. *b.* - दिव्यम् lege दीप्तम्.
- 111. - 7. *a.* - व्योमसञ्छाद्य lege व्योम सञ्छाद्य.
- 113. - 24. *b.* - शीलानाम् lege शिलानाम्.
- 115. - 2. *b.* - कालखण्डैश् lege कालकण्डैश्.
- 116. - 15. *a.* - कालकाण्डान् lege कालकण्डान्.
- 118. - 33. *a.* - सहसाणि lege सहस्राणि.

